UNIVERSITY OF MYSORE

ORIENTAL RESEARCH INSTITUTE SERIES No. 137

मैसूरु विश्वविद्यानिलयः

प्राच्यविद्यासंशोधनालयग्रन्थमाला—१३७

ANUBHAVA SŪTRA

OF

SRI MĀYIDEVA

श्री मायिदेव विरचितम्

अनुभवसूत्रम्

ORIENTAL RESEARCH INSTITUTE, MYSORE.

प्राच्यविद्यासंशोधनालयः मैसूरु

1983

First Edition 1983
प्रथमं मुद्रणम्—१९८३

Published by :
The Oriental Research Institute,
University of Mysore, Mysore.
मैसूरुविश्वविद्यानिलयप्राच्यविद्यासंशोधनालयद्वारा
प्रकाशितम्

Printed at:
Bhaskara Printers, Geethamandiram Road, Mysore-1.
भास्करमुद्रणालये मुद्रितम्
१९८३

UNIVERSITY OF MYSORE
ORIENTAL RESEARCH INSTITUTE SERIES-137

मैसूरु विश्वविद्यानिलयः
प्राच्यविद्यासंशोधनालयग्रन्थमाला–१३७

General Editor :
Vidvan **Dr. H. P. Malledevaru,** M.A., Ph.D.,
Director :
Oriental Research Institute, Mysore and
·ofessor and Head, Department of P. G. Studies
and Research in Sanskrit, Manasagangotri,
Mysore.

विद्वान्॥ डा०॥ हेच्. पि. मल्लेदेवरु, एम्.ए., पिहेच्.डि.
निर्देशकः, प्राच्यविद्यासंशोधनालयः
प्राध्यापकः, मुख्यश्च, स्नातकोत्तरसंस्कृताध्ययनसंशोधनविभागः,
मानसगङ्गोत्री, मैसूरुविश्वविद्यानिलयः, मैसूरु

ORIENTAL RESEARCH INSTITUTE, MYSORE.
प्राच्यविद्यासंशोधनालयः, मैसूरु
1983

University of Mysore
ORIENTAL RESEARCH INSTITUTE SERIES No. 137
प्राच्यविद्यासंशोधनालयग्रन्थमालाङ्कः—१३७

ANUBHAVASŪTRA
OF
SRI MĀYIDEVA

श्री मायिदेवविरचितम्

अनुभवसूत्रम्

Critically Edited by
Vidwan. **Dr. H. P. Malledevaru,** M.A., Ph.D.
DIRECTOR
Oriental Research Institute, Mysore

संपादकः
विद्वान्।। डा०।। हेच्. पि. मल्लेदेवरु, एम् ए पिहेच्.डि
निर्देशकः
प्राच्यविद्यासंशोधनालयः, मैसूरु

ORIENTAL RESEARCH INSTITUTE
University of Mysore, Mysore
1983

PREFACE

Sanskrit literature is very rich and vast. It has been enriched by the contribution of a good number of authors. Among them, only a few have given their geneology ; their number could be counted on fingertips. Fortunately, Māyideva, the author of Anubhavasūtra clearly states his geneology as well as his native place etc., in the beginning of this work.

'Aipura' (Magge,) which is on the bank of the river Malaprabhā (Malāpahāriṇi) in north Karnataka, was his native place. He praises, in a philosophic manner,[1] the greatness of that village (Aipuri) and also the sanctity of the river.

Upamanyu Śivācārya was the first preceptor of this geneology, in whom spiritual knowledge and action are blended harmoniously. Bhīmanātha Prabhu descended from Upamanyu Śivācārya and the former was known for his penance. Mahāgurukāleśvara was Bhīmanātha's son and he was well-versed in Śāstras. Boppanātha was the son of Mahāgurukaleśvara and he was deeply versed in Śrauta and smārta literature. Boppanātha's son was Nākarājaprabhu and his son was Saṅgameśvara who had mastery over Indian philosophy in general and Vīraśaiva philosophy in particular. Māyideva himself, the author of the present work, and son of Sangameśvara, gives the etymology of the term 'Māyideva'[2] as synonym to Śiva.

1. Anubhavasutra. I. st. 7–9
2. Anubhavasutra. I. st. 15–18

According to the statement of Channabasavapurāṇa[3] of Virupākṣa Paṇḍita and also tradition, Māyideva was a contemporary of Devarāya II, King of Vijayanagar (1419-1446 A. D.). Hence he seems to have been a contemporary of Jakkaṇṇa and Cāmarasa the well known Kannada writer. Therefore, Mayideva's date may be fixed at fifteenth century A.D.

Māyideva was a very great scholar and well-versed both in Sanskrit and Kannada. His works clearly reflect that he was proficient in Śruti, Āgamas, Upaniṣad, Gīta, Smṛti, Purāṇa, Darśanas and so forth. Māyideva is the author of the undermentioned six works. The first three are in Sanskrit and the next three are in Kannada.

1) Anubhavasutra (Śivānubhavasutram)
2) Viśeṣartha Prakaśika
3) Śatakatrayam
4) Ekottaraśatasthalaṣaṭpadi
5) Śatakatraya
6) Vacanas (He is said to have composed the Vacanas, but they are not available)

The works of Mayideva are very popular because they are replete with scholarship and crystal clear in exposition. Mayideva's profound scholarship and mastery over other branches of Indian philosophy have enabled him to elucidate the Śivadwaita (Vīraśaiva philosophy) in an excellent way. His works are indispensable to understand Vīraśaiva philosophy.

3. Channabasavapurana.

Mayideva is greatly extolled with reverence by all the later Vīraśaiva writers.

Anubhavasutra :

There are twenty eight Śaivagamas and two hundred and twenty five Upagamas. The twenty eight Śaivagamas commence with Kamika and end with Vatula. Vatula is regarded as the best among the Śaivagamas and it consists of two parts; the latter part is termed 'Pradīpa' or 'Śivasiddhantatantra. In that, the philosophy of ṣaṭsthala is narrated. Mayideva further expounds that Satsthala Siddhanta is based on Śruti, Śaivāgamas, Smṛti, Upaniṣads, Śivadharma, Puraṇas, Gīta, Anubhäva (intuitive knowledge) and Pramaṇas etc. The author humbly submits in Anubhavasutra that his intention was to expound the ṣaṭsthala philosophy which is the essence of the above- mentioned authoritative works.

Anubhavasutra consists of eight parts (Adhikaraṇas). In the first adhikaraṇa, the matter narrated above is stated along with the mention of the contents of the remaining seven parts. The Second adhikarana is called Sthalanirdeśa. In that, the Ultimate Reality (Brahman), is characterized as existence (Sat), intelligence (Cit) and bliss (Ānanda); it is also termed as Sthala. Māyideva gives a philosophical interpretation of the word 'Sthala'[4] by resorting to etymology ; accordingly, 'Stha' signifies 'Sthana' and 'la' means 'laya', because, it is the Absolute, the source and support of the evolution of the entire

4. Anubhavasutra. II. st. 3–9.

universe and of phenomenal existence and because ultimately it is the resting place of all beings and the entire universe. In short ' Sthala ' is the source of creation, evolution and also of involution.

Mayideva frequently uses and expounds terms like Sthala, Liṅga, Brahman and so forth. These terms, along with others like Tajjalan are used in several Upaniṣads and philosophical systems. However, in all of them, the conception and spirit behind these terms are more or less one and the same.

It is a well established fact that Śiva (Sthala) is inseparably associated with Śakti. Owing to agitation in Śakti, Sthala is divided into – (1) Liṅgasthala and (2) Aṅgasthala. It is to be noted that Śiva remaining unchanged in Himself appears in these two forms. Liṅgasthala is Śiva, the object of Worship (Upasya). Aṅgasthala is the individual soul, the Worshipper (Upasaka). Just as Sthala is divided into two forms, in the same manner Śakti which is integrally associated with Him, is also divided into two forms. In one form, Śakti as associated with Liṅga is being called Kala ; it is in favour of Pravṛtti. Naturally, it leads to entanglement with the world. The other form resorting to Aṅga is called Bhakti ; it is in favour of Nivṛtti. Ultimately Bhakti (devotion) helps the renuion of individual self (Aṅga) with the universal self (Liñga).

In the third adhikaraṇa, the division of iṅgasthala and its characteristics are elucidated.

Liṅga is derived from two roots, namely, 'lī' and 'gam'; 'Gam' to go, to issue forth, so to say the source of creation, and 'Li' to absorb — the object in which all things merge ultimately. Mayideva clearly explains that Liṅga is responsible for creation, protection and involution. Liṅga-sthala is three-fold viz., (i) Bhavaliṅga, (ii) Praṇaliṅga and (iii) Iṣṭaliṅga. These three liṅgas are again divided into six liṅgas in all as shown in the diagram below:

- Liṅgasthala
  - Bhavaliṅga
    - Maha-liṅga
    - Prasada-liṅga
  - Praṇaliṅga
    - Cara-liṅga
    - Śiva-liṅga
  - Iṣṭaliṅga
    - Guru-liṅga
    - Ācara-liṅga

These six liṅgas, commencing from Mahaliṅga and ending with Ācaraliṅga will be operated on by six kinds of Śakti viz., Citśakti, Paraśakti, Adiśakti, Icchaśakti, Jñanaśakti, and Kriyaśakti.

The fourth Adhikaraṇa narrates the details of Aṅgasthala. Aṅga denotes the spiritual aspirant soul. 'Am' means Ultimate Reality (Brahma) and 'ga' means that soul which moves or goes towards Brahma. Hence, Aṅga means the pure, aspirant individual self. Aṅgasthala is of three kinds viz., Yogaṅga, Bhogaṅga and Tyagaṅga. In the first (Yogaṅga), the individual Self attains the bliss of union with Liṅga (Śiva); in the second (Bhogaṅga), the self enjoys along with Śiva; and in the third (Tyagaṅga), it realises the true nature of this world. Each one of these three Aṅgas

is again divided into two kinds as shown in the following diagram :

Yogaṅga		Bhogaṅga		Tyagaṅga	
Aikya	Śaraṇa	Praṇa-liṅgin	Prasad-in	Maheśa	Bhakta

The stages from Bhakta to Aikya indicate the stages of development of Bhakti (true devotion) in the aspirant. The progressive development of Bhakti in these six stages, namely Bhakta, Maheśa, Prasadin, Praṇaliṅgin, Śaraṇa and Aikya is further indicated, respectively by such terms as Śraddha, Niṣṭhā, Avadhana, Ānubhava, Ananda and Samarasa. The characteristics of Bhakta, Maheśa etc. are also described in detail.

The fifth Adhikaraṇa is termed 'Liṅgañga samyogavidhi'. The union (Samyoga) of individual self (Añga) with the universal self (Liñga) is termed 'Liñgañgasamyogavidhi'. The Upaniṣad mahavakya 'tattvamasi' is also interpreted as being the same in spirit as 'Liñgañgasamyogavidhi'. Further, Dīkṣa 'initiation into the spiritual path', and the details of Dīkṣa which is said to be threefold are narrated in this adhikaraṇa.

The sixth adhikarana is termed 'Sarvañga-liñga-sahityanirupaṇa'. In the individual self rendered pure through the three-fold inltiation Dīkṣa, further transformation of the entire body is effected by way of establishing the different liñgas in the sense-organs of knowledge (Jñanendriyas) and in the sense-organs of

action (Karmendriyas). Thus the complete body is transformed.

The seventh adhikaraṇa deals with Arpaṇasad-bhava' and it is two-fold viz., Kriyarpaṇa and Jnanar paṇa, according to which all the objects of the world are to be used only after they are offered to God (Liñga).

In the eighth and last adhikaraṇa termed 'Kriya-viśranti', the best device of offering to God (Liñga) including actions is narrated in detail.

In short, Anubhavasutra is also regarded as an abstract of Uttaravatulagama and is considered as a very valuable and authoritative work for understanding Viraśaiva philosophy.

The munificent grant by the Government of Karnataka has made it possible to bring out the present edition of 'Anubhavasūtram' along with nine other publications namely:

1. Nyāyamañjari- Vol. II
2. Descriptive Catalogue-Vol.IX
3 Vātulaśuddhāgama-Vol.I
4, Vātulaśuddhāgama Vol.II
5. Yoga Śataka
6. Brahmasūtra Bhāṣya
7. Mādhavīya Dhātuvṛtti Vol. I
8. Bodhāyana Guhyasutra
9. Brahmasutravrthi

and with nine works namely:

1. Siddhānta Siddhāñjana
2. Āpastamba Gṛhyasūtra
3. Aṇubhāṣya with Commentary

4. Descriptive Catalogue No. 10
5. Descriptive Catalogue No. 7
6. Śivatattva Ratnākara
7. Tarka Tāṇḍava
8. Vīrāgama-Vol.1
9. Raghunātha Vijaya

in the press.

Further owing to the generous grant from the Government of India and Government of Karnataka, the Oriental Research Institute is now equipped with the first tier out of the three tier system for preserving manuscripts and also with a fumigation chamber duly installed. Hence our grateful thanks are due to the Government of India and Government of Karnataka in this behalf.

I should mention here the good and expeditious work of Sri S. Chandrashekhar, Proprietor of Bhaskara Printers, Mysore. It is a pleasant duty to acknowledge the kind co-operation of the members of the Syndicate, University of Mysore, and the Advisory Committee of the Oriental Research Institute in publishing valuable works.

Our beloved Vice-Chancellor Prof. K. S. Hegde and Registrar Sri V. C. Hullur, I.A.S. are extending their timely help and encouragement for the research work and publications of our Institute. I take this opportunity to express our sincere gratitude to them and assure that the Institute will strive hard to bring out many more valuable works.

H. P. Malledevaru

अनुभवसूत्राधिकरण विषय सूची

॥ ओम् ॥

श्रीमायिदेवविनिर्मितं

अनुभवसूत्रम्

पारम्पर्यक्रमाभिधानं

प्रथमाधिकरणम्

---

*शमितविनमदार्तिं षट्स्थलब्रह्ममूर्तिं
प्रविदितगुरुपारम्पर्यविद्याब्धिपारम् ।
विमलचरितपुण्यं वीरशैवाग्रगण्यं
प्रणम गुरुवरेण्यं पर्वतेन्द्रं शरण्यम् ॥ १ ॥

जयति षडध्वविशुद्धि-
र्जयति श्रीमत्षडक्षरी-[1]विद्या[1] ।
[2]जयति[2] षड[3]ङ्गा[3] भक्ति-
र्जयति स्वत एव षट्स्थलब्रह्म ॥ २ ॥

---

[1] विद्रा (अ). [2] जयति जयति (अ) [3] ङ्ग (क्ष)

---

* 'शमित' इत्यादिमं पद्यं तावत् 'अ' पुस्तकमात्रे दृश्यते । अत्र च— 'शमिद्' इति ताळग्रन्थपाठः । 'शमित' इति युक्तः पाठः । अस्य च पद्यस्य 'अ' पुस्तके टीकायाः (कर्णाटकयाः) उपलभ्यमानत्वात्, इदं पद्यं मूलकृतो वा अन्यस्य वा भवेत् इत्यनुमिनुमः ।

अवाच्यात्मस्वरूपाय शिवभावप्रदायिने ।
नमस्सद्गुरुनाथाय षट्स्थलब्रह्ममूर्तये ।। ३ ।।

नमश्शिवाय स्वयमात्तनाम्ने
स्वभावसंसिद्धमहामहिम्ने ।
[1]स्वलीन[1]षट्त्रिंशदखण्ड[2]धा[2]म्ने
स्वमायया कल्पितभूतभूम्ने ।। ४ ।।

नमश्शिवायै शिववल्लभायै
शिवानुभूतिप्रतिभाकलायै ।
शिवप्रसादामलविग्रहायै
शिवप्रदायै भवता[3]दु[3]मायै ।। ५ ।।

य[4]स्या[4] मात्रात्रयं नाम [5]व्यत्यस्त[5]प्रणवात्मकम् ।
बभौ ह्रस्वद्वयं दीर्घं द्विमात्रत्वादुमैव सा ।। ६ ।।

तयोमया सार्धमुपासितत्वात्
शिवस्सदानन्दचिदा[6]त्म[6]संज्ञः ।
प्रशस्यते सोम इति प्रतीत्या
तमैपुराधीश्वरमानतोऽस्मि ।। ७ ।।

एकाक्षराभिधेयोऽभूत् ऐकारेणेश्वरः वयम् ।
यत्पुरं वपुरैश्व[7]र्यं[7] परं धाम तदैपुरम् ।। ८ ।।

मलप्रहारिणी नाम गङ्गा त्रिमलनाशिनी ।
त्रिदीक्षापथगा तीर्थं तत्ती[8]रं[8] क्षेत्रमैपु[9]रम्[9] ।। ९ ।।

---

[1] स्वल्पेन (अ) [2] दा (अ) [3] मु (अ, क) [4] स्य (क) [5] व्यत्यस्थं (अ), व्यत्य . . . . (क) [6] दि (अ, क) [7] यं (अ, क) [8] रे (अ) (क) [9] री (अ. क्ष).

तामैपुरीमहं वन्दे भवपाशनिकृन्तनीम् ।
य[1]स्यां[1] सन्निहि[2]तः[2] प्रीत्या सोमस्सोमार्धशेखरः ॥ १० ॥

* विततविविधलोकव्यापिना स्वेन भासा
शशिरविशिखिमुख्यान् भासयन् ज्योतिराख्यान् ।
वसति विमलविद्याजन्मवा[3]से[3] निवासे
जयति स खलु योऽपावैपुरीसोमना[4]थः[4] ॥ ११ ॥

† तस्य प्रसादेन तपोबलेन
ज्ञानक्रिया[5]योग[5]समन्वितेन ।
विष्णोस्स्वयं देशिक एव जातः
साक्षाच्छिवात्मादिगुरूपमन्युः ॥ १२ ॥

उपमन्युशिवाचार्यनामतः श्रीमदैपुरे ।
जातः प्राथमिकः श्रीमान् उपमन्युमुनीश्वरः ॥ १३ ॥

यस्स्वेच्छया ह्यैपुरसोमनाथ—
पादारविन्दप्रवणैकचेताः ।
आविर्बभूवादिगुरूपम[6]न्यु[6]
श्रीभीमनाथप्रभुरा[7]द्य[7]वेद्यः ॥ १४ ॥

---

[1] स्य (क) [2] ती (अ, क) [3] सं (क) [4] था (क) [5] सार (क)
[6] न्योः (अ). [7] र्य (य, क्ष)

---

* 'वितत' इत्यनन्तरं 'व्यापिना' इत्यन्तं 'क' पुस्तके ताळस्य त्रुटितत्वात् सपाठस्तत्पुस्तकमात्रे नष्टः । एवं 'अ' प्रतौ पद्यारम्भकाले मालिनीवृत्तमिति छन्दोनिर्देशश्चास्ति ।

† अत्र 'अ' पुस्तके इन्द्रवज्रा इति वृत्तनिर्देशो दृश्यते ।

अ[1]स्य प्रभोरुदभवत्करुणाबलेन
विद्याविलासविभवाकृतिपात्रगात्रः ।
आचार्यल[2]क्ष[2]णपरिस्फुटसच्चरित्रः
श्रीमन्महागुरुकलेश्वरनामधेयः ॥ १५ ॥

*आचार्यस्य कलेश्वराह्वयमहादेवस्य †सूनुर्महान्†
श्रीतस्मार्तसमागमप्रथितनिष्ठैकप्रतिष्ठापरः ।
शैवाद्वैतशिरोव्रताङ्गसमयाचारक्रियादेशिकः
साक्षादैपुरमन्दिरः परगुरुः श्रीबोप्पनाथः प्रभुः ॥ १६ ॥

श्रीमद्देशिकबोप्पनाथपरमेशा‡नात्मजः सद्गुरुः‡
¶श्रीसोमेश्वर¶लिङ्गभक्तियजनध्यानैकनिष्ठापरः ।
श्रीवीरव्रतसत्यधर्मनियमश्रद्धाऽधिरूढक्रियः
श्रीशैवोत्तरतत्त्वयोगरसिकः श्रीनाकराजप्रभुः ॥ १७ ॥

**श्रीनाकराजपरमेश्वरदेशिकेन्द्र—
कारुण्यबन्धुरकटाक्षनिरीक्षणेन ।
जातः शिवैकगतमानसचारुचेष्टः
श्रीसङ्गमेश्वरमहाप्रभुरार्यवर्यः ॥ १८ ॥

---

[1] त (य, क्ष) [2] क्ष्म (अ, क)

---

* अत्र 'शार्दूलविक्रीडितम्' इति 'अ' पुस्तके वृत्तनिर्देशः कृतः ।

† एतच्चिह्नान्तर्गतो भागः 'क' पुस्तके त्रुटितताळे नष्टः ।

‡ एतच्चिह्नान्तर्गतो भागः 'अ' पुस्तके नास्ति ।

** 'श्रीनाकराज' इति पद्यात्पूर्वं 'वसन्ततिलकावृत्तम्' इति 'अ' पुस्तके वृत्तनिर्देशो दृश्यते ।

एतस्य सङ्गमेशार्यवर्यस्यायं तनूभवः ।
नाम्ना कल्याणदश्श्रीमान् मा[1]यि[1]देव इति स्थि[2]तः[2] ।। १९ ।।

(*कल्याणमिति कैवल्यं धा[3]तो[3]र्दानेदमुच्यते ।)
माहेशानां स्वभक्तानां कल्याणपदकाङ्क्षिणाम् ।। २० ।।

†ददाति नित्यकल्याणं तेन कल्याणद[4]श्शिवः[4]† ।
मायया कथ्यते मायी मायी विष्णुरिति स्मृतः ।
[5]मायिनो यः[5] परो देवो मायिदेवस्स [6]कथ्यते[6] ।। २१ ।।

तस्मात्कल्याणदश्श्रीमान् मायिदेवः ‡स्वयं शिवः ।‡
तस्यास्य परमेशस्य नामाङ्कोऽयं शिवात्मकः ।। २२ ।।

§[कल्याणदाह्वयश्श्रीमान् मायिदेवमहाप्रभुः ।]
सत्यशुद्धशिवाद्वैतविद्यातन्त्रस्वतन्त्रधीः ।। २३ ।।

---

[1] यी (अ) [2] तिः (अ, क) [3] तु (क) [4] श्रुतः (य, क्ष).
[5] मायिदेवः (अ, क). [6] उच्यते (क, य, क्ष).

---

* 'कल्याणमिति' इति धनुरर्धचिह्नान्तर्गतः श्लोकार्धभागः 'य, क्ष' पुस्तकयोर्नास्ति ।

† एतच्चिह्नान्तर्गतो भागः 'अ' पुस्तके नास्ति ।

‡ अत्र ('शिवस्स्वयं' इति 'य, क्ष' योः पदविपरिणामो दृश्यते ।

§ अत्र चतुरश्रचिह्नान्तर्गतो भागः 'य' पुस्तके नास्ति । अथ च 'कल्याणदेति' पद्यस्य पूर्वोत्तरार्धयोर्विपरिणामश्च 'क, क्ष' यो. दृश्यते ।

*जयति परमशैवः स्वात्मविद्याधिदैवः
कुम[1]ति[1]मतविभेदी षट्स्थलब्रह्मवादी ।
गुरुपदनिजभक्तः केव[2]ला[2]नादिमुक्तः
सुचरितशिववर्मा मायिदेवो महात्मा ॥ २४ ॥

अयं शिवाद्वैतपरो महात्मा
परम्परापावनसम्प्रदायः ।
शिवेन देव्यै कथितं रहस्यं
ततान यत् षट्-स्थलनिर्णयं तत् ॥ २५ ॥

कामिकाद्या वातुलान्ताः शिवेनो[3]क्ता[3]श्शिवाग[4]मा[4]ः ।
तेषु वातुलसंज्ञोऽयं सर्वोत्कृ[5]ष्ट[5]महागमः ॥ २६ ॥

वा[6]तु[6]लाख्ये महातन्त्रे पूर्वोत्तरविभेदतः ।
भागद्वयं समाख्यातं तस्मिन्नुत्तरनामनि ॥ २७ ॥

तन्त्रोत्तरप्रदीपाख्यं शिवसिद्धान्ततन्त्रकम् ।
अस्ति तत्राह देवेशो देव्यै षट्स्थलनिर्णयम् ॥ २८ ॥

श्रुतिस्मृतीतिहासैश्च शिवधर्मादिशास्त्रकैः ।
कथ्यते शिवसिद्धान्ततन्त्रे षट्स्थलनिर्णयम् ॥ २९ ॥

---

[1] त (य, क्ष). [2] लो (क्ष). [3] क्त (अ, क). [4] मः (अ, क). [5] ष्टो (अ, क). [6] तू (अ, क).

---

*'जयति' इति पद्यात्पूर्वं 'मालिनीवृत्तम्' इति 'अ' पुस्तके वृत्त-निर्देशो दृश्यते ।

शिवागमैश्शिवाद्वै[1]त[1]रहस्यैः पारमा[2]र्थि[2]कैः ।
कथ्यते शिवसिद्धान्ततन्त्रं षट्स्थलनिर्णयम् ।। ३० ।।

सर्वैरुपनिषद्वाक्यैः पुराणैरुत्तरा[3]र्थ[3]कैः ।
कथ्यते शिवसिद्धान्ततन्त्रं षट्स्थलनिर्णयम् ।। ३१ ।।

गी[4]त[4]सारैः [5]समस्तै[5]श्च पुरातनमहामतैः ।
कथ्यते शिवसिद्धान्ततन्त्रं षट्स्थलनिर्णयम् ।। ३२ ।।

गुरूक्त्या स्वानुभूत्या च तर्कतश्च प्रमाणतः ।
कथ्यते शिवसिद्धान्ततन्त्रं षट्स्थलनिर्णयम् ।। ३३ ।।

एतेषामेव [6]सर्वा[6]र्थसारमादाय सादरम् ।
शिवो[7]क्तं[7] शिवसिद्धान्ततन्त्रं वक्ष्ये समासतः ।। ३४ ।।

यैश्च कैश्चिदपि श्लोकैः [8]ए[8]त्प्रारब्धं समाप्यते ।
[9]तद्विवक्षा[9] मया कार्या किमन्यैर्बहुविस्तरैः ।। ३५ ।।

तत्र तावदिदं पूर्वं पारम्पर्यक्रमाभिधम् ।
स्थलनिर्देशसंज्ञं तु द्वितीयमत उच्यते ।। ३६ ।।

तृतीयमुच्यते साक्षात् *लिङ्गस्थलनिरूपणम् ।
†चतुर्थं कीर्त्यते†* तद्वदङ्गस्थलनिरूपणम् ।। ३७ ।।

---

1 तं (य, क्ष)· 2 र्थै (य, क्ष). 3 ध (क्ष)· 4 ता (य, क्ष)· 5 समासै (अ)· 6 सत्या (क). 7 क्त (क). 8 त (क). 9 तदेव त्वां (क).

---

* एतच्चिह्नान्तर्गतभागः 'क' पुस्तके ग्रन्थपाताल्लुप्तः ।

† एतच्चिह्नान्तर्गतो भागः 'अ' पुस्तके ग्रन्थपातात् लुप्तः । अतः सन्दर्भानुरोधतः अर्थस्वारस्यप्रकटणाय मुद्रिताभ्यां 'य, क्ष' पुस्तकाभ्यां अयं भागः उद्धृत्य सङ्कलितः ।

पञ्चमं चैव लिङ्गाङ्गसंयोगविधिसंज्ञकम् ।
सर्वाङ्गलिङ्गसाहित्यं षष्ठाधिकरणं भवेत् ॥ ३८ ॥

श्रीलिङ्गार्पणसद्भावसंज्ञं सप्तममिष्यते ।
क्रियाविश्रान्तिसंज्ञाऽधिकरणं चाष्टमं भवेत् ॥ ३९ ॥

एवमष्टाधिकरणं शिवसिद्धान्ततन्त्रकम् ।
एतद्यो वेद सोऽविद्याग्रन्थिं विकिरति प्रभुः ॥ ४० ॥

शिवसिद्धान्तकं तन्त्रं शिवाद्वैतं शिवं पदम् ॥ ४१ ॥

[1]इत्यनु[1]भवसूत्रे *शिवसिद्धान्त[2]तन्त्रे[2]* षट्स्थलनिर्णये
पारम्पर्यक्रमो नाम प्रथमाधिकरणं
†सम्पूर्णम्

---

[1] इति शिवानु-(क्ष). [2] तन्त्र-(क).

---

* एतच्चिह्नान्तर्गतो भागः ‘ य, क्ष ’ योः न दृश्यते ।
† ‘ सम्पूर्णम् ’ इति ‘ क्ष ’ पुस्तकमात्रपाठः ।

श्रीमायिदेवविनिर्मितं

अनुभवसूत्रम्

स्थलनिर्देशनिरूपणम्

द्वितीयाधिकरणम्

तदिदानीं प्रवक्ष्यामि स्थलनिर्देशमादितः ।
यदुक्तं देवदेवेन रहस्यार्थं समासतः ॥ १ ॥

एकमेव [1]परं[1] ब्रह्म सच्चिदानन्दलक्षणम् ।
शिवतत्त्वं शिवाचा[2]र्याः[2] स्थलमित्याहुरादरात् ॥ २ ॥

सर्वेषां स्थानभूतत्वाल्लयभूतत्वतस्त[3]था[3] ।
तत्त्वानां [4]म[4]हदादीनां स्थलमित्यभिधीयते ॥ ३ ॥

* यत्रादौ स्थीयते विश्वं [5]प्रोक्तं तत्पौ[5]रुषं य[6]था[6] ।
लीयते पुनरन्ते च स्थलं तत्प्रोच्यते त[7]था[7] ॥ ४ ॥

स्थका[8]रः[8] स्थानवाची स्यात् लकारो लयवाचकः ।
तयोः कारणभूतं यत् तदेव स्थलमुच्यते ॥ ५ ॥*

---

[1] र (अ, क). [2] र्यः (क). [3] तः (अ, क). [4] तु म (अ, क)
[5] प्राकृतं पौ (य, क्ष). [6] तः (य, क्ष). [7] तः (य, क्ष). [8] रं (अ, क).

---

* एतच्चिह्नान्तर्गतो भागः 'अ' पुस्तके ग्रन्थापाताल्लुप्तः ।

अधिष्ठानं समस्तस्य स्थावरस्य चरस्य च ।
जगतो यद्भवेत्तत्वं [1]तद्दिव्य[1]स्थलमुच्यते ।। ६ ।।

आधा[2]र[:][2] सर्वशक्तीना ज्योतिषामखिलात्मनाम् ।
यत्तत्वं मन्यते प्राज्ञैः स्थल तत्परिगीयते ।। ७ ।।

आल[3]य:[3] सर्वभूतानां लोकानां [4]लोक[4]सम्पदाम् ।
यद्भवेत्परमं ब्रह्म स्थलं तत्प्राहुरक्षरम् ।। ८ ।।

प[5]र[5]निर्वाणनिष्ठानां यद्भवेत्परमं पदम् ।
तदाहुः स्थलमद्वैतं शिव[6]योगै[6]कतत्पराः ।। ९ ।।

स्वशक्तिक्षोभमात्रेण स्थलं तद्द्विविधं भवेत् ।
ए[7]कं[7] लिङ्गस्थलं प्रोक्तं अन्यदङ्गस्थलं स्मृतम् ।। १० ।।

लिङ्गाङ्गोपाधिभेदेन द्विधा भिन्नं परस्परम् ।
म[8]हान् घ[8]टप्रभेदेन यथाकाशः प्रतीयते ।। ११ ।।

*प्रतीयते तथा चैव स्थलं लिङ्गाङ्गभेदतः ।
†स्थलं नाम परं तत्वं शिवरुद्रादि†सं[9]ज्ञक[9]म् ।। १२ ।।

उपास्योपासकत्वेन स्वयमेव द्विधा भवेत् ।
लिङ्गस्थलमुपास्यं स्यात् अङ्गस्थलमुपासकम् ।। १३ ।।

---

[1] तद्दिवै (य, क्ष). [2] रं (अ, क, य, क्ष). [3] यं (क). [4] सर्व (य, क्ष). [5] रा (अ, क). [6] ज्ञानै-(य, क्ष). [7] क (अ, क). [8] महद्घ-(य, क्ष). [9] ज्ञिम् (अ, क).

---

* 'प्रतीयते' इति 'क' पुस्तके ग्रन्थपातात्लुप्त ।

† एतच्चिह्नान्तर्गतो भागः 'क' पुस्तके तालस्य त्रुटितत्वात् लुप्तः ।

उपा*स्य[1]त्वं तथो[1]पासकत्वं च परमश्शिवः ।*
अप्रच्युतात्म[2]भावे[2]न स्थितस्स[3]न्ना[3]त्मलीलया ।। १४ ।।
स्वशक्त्या युगपत्साक्षात् प्राप्त एव स्वयं क्रमात् ।

नाशिवस्य शिवोपास्तिर्घटते †जन्मकोटिभिः ।
शिवस्यैव शिवोपास्तिरिति† नानाश्रुति[4]स्मृ[4]तिः ।। १५ ।।

‡[5]चि[5]न्मात्रपर‡मं साक्षात् स्थलं सत्यादिलक्षणम् ।
लिङ्गाङ्ग[6]त्व[6]शिवा[7]त्मत्व[7]भेदेनैव स्वयं [8]स्थितम्[8] ।। १६ ।।

शिवत्वेनात्मरूपेण यथा चिन्मात्रमुच्यते ।
लिङ्गत्वेना[9]ङ्ग[9]रूपेण स्थ[10]ल[10]§मात्रं तथोच्यते§ ।। १७ ।।

स्थलं चिन्मात्रमेव स्यात् लिङ्गं स्याच्छिव एव हि ।
तथा[11]ङ्ग[11] जीव एव स्यात्[12]¶ इति [12]शैवी परा स्थितिः ।। १८ ।।

यथा स्थलं द्विधा भूतं तथा शक्तिः¶ द्विधा भवेत् ।
शक्तिरप्रति[13]मा[13]साक्षाच्छिवेन सहधर्मिणी ।। १९ ।।

---

[1] स्वतदो (अ, क) [2] भेदे (अ, य, क्ष). [3] स्सर्वा (क).
[4] स्थि (अ, य, क्ष). [5] ज (क). [6] त्वं (अ). [7] त्वं (अ). [8] श्रितः (क). [9] त्म (क). [10] लं (अ, क). [11] ङ्ग (अ, क). [12] इति मे (क).
[13] धा (अ).

---

* एतच्चिह्नान्तर्गतो भागः ' क ' पुस्तके ताळस्य त्रुटितत्वात् लुप्तः ।
† एतच्चिह्नान्तर्गतो भागः ' क ' पुस्तके त्रुटितताळे लुप्तः ।
‡ एतच्चिह्नान्तर्गतो भागः ' अ ' पुस्तके त्रुटितताळे लुप्तः ।
§ एतच्चिह्नान्तर्गतो भागः ' अ ' पुस्तके त्रुटितताळे लुप्तः ।
¶ एतच्चिह्नान्तर्गतो भागः ' अ ' पुस्तके त्रुटितताळे लुप्तः ।

साक्षिणी [1]सत्यसम्पूर्ण[1]निर्वि[2]कल्पा[2] महेश्वरी ।
सा श[3]क्तिश्च द्वि[3]धा भू[4]ता[4] स्वस्वातन्त्र्यबलेन तु ॥ २० ॥

समानधर्मिणीत्वेन विभक्ता भक्तवत्सला ।
लिङ्गस्थलाश्रया काचित् काचिदङ्गस्थलाश्रया ॥ २१ ॥

लिङ्गस्थलाश्रया शक्तिः कलारूपा प्रकीर्तिता ।
अङ्गस्थलाश्रया शक्तिः भक्तिरूपा भ[5]वा[5]पहा ॥ २२ ॥

यथा महानलज्वाला विभक्ता दीपिकाकृतिः ।
तथा [6]मा[6]हेश्वरी शक्तिः विभक्ता भक्तिरूपिणी ॥ २३ ॥

ज्वाला तमस्विनी यस्माद्दीपिका सम्प्रकाशिनी ।
तस्मा[7]त्तद्वा[7]सनाशक्तिः [8]भक्तिर्नि[8]र्वासना मता ॥ २४ ॥

भक्तिर्महत्तरा शुद्धा सुसूक्ष्मा शोभना परा ।
सच्चिदानन्दरूपा[9]ख्या भुक्तिमुक्ति[9]फलप्रदा ॥ २५ ॥

शक्तिरेव स्मृता भक्तिः भक्तिरेव हि सा सदा ।
शक्तिभक्त्योर्न भेदोऽस्ति परमार्थनिरूप[10]णे[10] ॥ २६ ॥

श[11]क्तिः[11] प्रवृत्तिराख्याता निर्वृत्तिर्भक्तिरीरिता ।
श[12]क्तिः[12] प्रपञ्चसृष्टिस्स्यात् भ[13]क्ति[13]स्तद्विलयो मतः ॥ २७ ॥

---

[1] शाश्वती पूर्णा (क), सत्यसम्पूर्णा (य, क्ष). [2] शेषा (क). [3] क्तिर्द्विवि (क). [4] त्वा (क). [5] या (क). [6] म (य, क्ष). [7] त्सवा (य, क्ष). [8] भक्तिनि (य, क्ष). [9] स्यात् भक्तिर्मुक्ति (य, क्ष). [10] णम् (अ). [11] क्ति (अ, क). [12] क्तिः (अ, क). [13] क्तिः (क)

---

* एतच्चिह्नान्तर्गतो भागः 'अ' पुस्तके ग्रन्थपातात्लुप्तः ।

[1]शक्ति[1] वैचित्र्यतो रू[2]पं[2] नीरूपमपि याति हि ।
भक्तिवैचित्र्यतो [3]रूपमपि नीरूपतामियात्[3] ॥ २८ ॥

प्रपञ्चवृद्ध्यपेक्षा *हि शक्तेः स्वाभाविको गुणः ।
प्रप[4]ञ्चसङ्क्ष[4]यापेक्षा भक्तेः स्वाभाविको गुणः ॥ २९ ॥

अधोमुखी भवेच्छक्तिः भक्तिरूर्ध्वमुखी भवेत् ।
समाया शक्तिराख्याता निर्माया भक्तिरीरिता ॥ ३० ॥

अपि तर्कप्रमाणाभ्यां शक्तेर्भक्तिर्गुणाधिका ।
उपास्यत्वं भवेच्छक्त्या भक्त्योपासकता भवेत् ॥ ३१ ॥

तस्माल्लिङ्गस्थले शक्तिः भक्तिरङ्गस्थले स्थिता ।

लिङ्गस्थलं शि[5]व[5]स्साक्षात् जीवात्माऽङ्गस्थलं भवेत् ।
लिङ्गाङ्गस्थलयो[6]रैक्यं[6] शिवजीवैक्यमेव हि ॥ ३२ ॥

---

1 भक्ति (अ, य, क्ष

2 पा (क).

3 रूपं निरूपमपि तामियात् (अ), रूपा विरूपामता तापितामपि तामियात् (क), रूपं निरूपमपि याति हि (य) रूपमपि नीरूपतामियात् (क्ष).

4 ञ्चापजया (अ, क).

5 वं (अ).

6 रेकं (क).

---

* 'हि' इति 'अ' पुस्तके ग्रन्थपातात्लुप्त इति ज्ञायते—यतष्टीकायामयं शब्दो दृश्यते ।

एतद्यो[1] वेद सो[1]ऽविद्याग्रन्थिं विकिरति प्रभुः ।
शिवसिद्धान्तकं तन्त्रं शिवाद्वैतं [2]परं[2] पदम् ।। ३३ ।।

[3]इत्य[3]नुभवसूत्रे *शिवसिद्धान्ततन्त्रे षट्स्थलनिर्णये
स्थल[4]निर्देशो[4] नाम द्वितीयाधिकरणं
†सम्पूर्णम्

---o---

[1] वेद सा (अ, क), वेत्ति सो (क्ष). [2] शिवं (क, य, य).
[3] इति शिवा (क्ष). [4] र्णयो (य, क्ष).

* एतच्चिह्नान्तर्गतो भागः 'क्ष' पुस्तके नास्ति ।
† एतच्चिह्नान्तर्गतो भागः 'य, क्ष' पुस्तकयोः न दृश्यते ।

लिङ्गस्थलनिरूपणम्

तृतीयाधिकरणम्

इदानीमथ वक्ष्यामि लिङ्गस्थलनिरूपणम् ।
सङ्क्षेपाद्विस्तरे[1]णापि[1] यथोक्तं शम्भुना पु[2]रा[2] ।। १ ।।

शिव एव स्वयं लिङ्गमिति लिङ्गस्य वैभवम् ।
नान्यच्चिह्नादिकं लिङ्गं तत्सर्वं कृतकं च यत् ।। २ ।।

लीयते गम्यते यत्र येन सर्वं चराचरम् ।
तदेतल्लिङ्गमित्युक्तं लिङ्गतत्त्वपरायणैः ।। ३ ।।

*लयगत्यर्थयोर्हेतुभूतत्वात्सर्वदेहिनाम् ।
लिङ्गमित्युच्यते साक्षात् शिवस्सकलनिष्कलः* ।। ४ ।।

लिङ्गस्थलं त्रिधा ज्ञेयं तद्भेदो वर्ण्यते क्रमात् ।
प्रथमं भावलिङ्गं स्यात् द्वितीयं प्राणलिङ्गकम् ।। ५ ।।

---

[1] ण हि (क). [2] रः (क)-

---

* एतच्चिह्नान्तर्गतं भागद्वयं 'अ' पुस्तके ग्रन्थपाताल्लुप्तम्—यतोऽनयो-र्भागयोस्तत्र टीका परं दृश्यते ।

तृतीयमिष्टलिङ्गं स्यात् इत्येतत् त्रिविधं स्मृतम् ।। ६ ।।

निष्कलं भावलिङ्गं स्यात् भावग्राह्यं परात्परम् ।
सन्मात्रं भावलिङ्गं स्यात् इति निष्ठा महात्मनाम् ।। ७ ।।

प्राणलिङ्गं मनोग्राह्यं भवेत्सकलनिष्कलम् ।
तत्प्राणेष्वन्तर्मनसो लि[1]ङ्गमाह[1] इति [2]श्रु[2]तिः ।। ८ ।।

सकलं दृक्कलाग्राह्यं [3]इ[3]ष्टलिङ्गस्थलं महत् ।
इ[4]ष्टावाप्ति[4]करं साक्षात् अनिष्टपरिहारकम् ।। ९ ।।

*इष्टिः पूजा [5]य[5]था नित्यं इष्टं पूजितमादरात् ।
इष्टलिङ्गमिति प्रोक्तं आचार्यैर्लिङ्गपूजकैः ।।* १० ।।

इष्ट[6]मर्थं[6] [7]स्वभक्तानां अनुयच्छति सर्वदा[7] ।
[8]तदिष्ट[8]लिङ्गमि[9]त्याह[9] तस्मादाथर्वणी श्रुतिः ।। ११ ।।

सद्रूपं भावलिङ्गं स्यात् चिद्रूपं प्राणलिङ्गकम् ।
आनन्दरूपमाचार्यैः इष्टलिङ्गमुदाहृतम् ।। १२ ।।

---

[1] ङ्गं प्राहुः (क). [2] स्मृ (अ, क). [3] चे (क). [4] ष्टसिद्धि (क). [5] त (य, क्ष). [6] मूर्जं (अ, क). [7] स्वभाक्तानामनुयच्छति सर्वदा (अ), तपसाप्यनुयुज्यति यत्नतः (क). [8] इष्ट (अ), तद्दिष्ट (क). [9] ति प्राह (अ), त्याहुः (क).

---

* 'इष्टिः पूजा' इत्ययं श्लोकः 'अ' ग्रन्थे ग्रन्थपातात् लुप्तः— यतः तत्र टीकामात्रमस्य श्लोकस्य दृश्यते ।

*अ[1]स्य[1]र्थो भावलिङ्गं स्यात् [2]त्व[2]मर्थः प्राणलिङ्ग[3]कः[3] ।
तदर्थ[4]स्त्वि[4]ष्टलि[5]ङ्गं स्या[5]त् पदत्रयनिरूपणे* ।। १३ ।।

भावलिङ्गं परं तत्त्वं प्राणलिङ्गं तु सूक्ष्मकम् ।
इष्टलिङ्गं भवेत् स्थूलं एतल्लिङ्गत्रयं स्मृतम् ।। १४ ।।

*स्थूलं बाह्यमिति प्रोक्तं सूक्ष्ममाभ्यन्तरं स्मृतम् ।
[6]सबाह्या[6]भ्यन्तरं यत्तत्परमित्यभिधीयते ।। १५ ।।

देहप्राणात्मरूपेण क्रियामंत्रप्रयोगतः ।
बिन्दुनादकलाभे[7]दालि[7]ङ्गत्रयमुदाहृतम्* ।। १६ ।।

एकमेकं स्थलं भूयो द्विविधं द्विविधं भवेत् ।
भावलिङ्गस्थलं द्वेधा प्राणलिङ्गस्थलं द्विधा ।। १७ ।।

†इष्टलिङ्गस्थलं चैव द्विधा प्रोक्तं महात्मभिः ।। १८ ।।

महालिङ्गं प्रसादा[8]ख्यं[8] लिङ्गमित्युभयस्थलम् ।
[9]भा[9]वलिङ्गं भवत्येव स्वानुभूतिप्रमाणतः ।। १९ ।।

तथा च चरलिङ्गं च शिवलिङ्गमिति द्वयम् ।
प्राणलिङ्गं भवत्येव तात्पर्या[10]र्थो न सशयः[10] ।। २० ।।

---

[1] स्या (क)· [2] त (क). [3] कम् (क, य, क्ष)· [4] मि (क). [5] ङ्गस्स्या (क)· [6] बाह्यमा (अ)· [7] द्लि (क). [8] रुय (अ, य, क्ष). [9] भ (अ). [10] र्थनिरूपणे (क)·

---

* ईदृशचिह्नान्तर्गतं भागद्वयं 'अ' कोशे ग्रन्थपातात्लुप्तम् ; यतस्तत्र हि टीका परमस्य लभ्यते।

† अस्मिन् अधिकरणे श्लोकार्धमेतत् १८ सङ्ख्याकत्वेन परिगणितं मुद्रितकोशान्तरेषु दृश्यते । स च क्रमः अत्राप्यादृतः ।

गुरुलिङ्गं तथाचा[1]रलिङ्गमि[1]त्युभयस्थलम् ।
इष्टलिङ्गं भवत्ये[2]वं[2] सत्यमुक्तमिदं मया ॥ २१ ॥

महालिङ्गं प्रसादाख्यलिङ्गं च चरलिङ्गकम् ।
शिवलिङ्गं तथा चैव गुरुलिङ्गं ततः परम् ॥ २२ ॥

†आचारलिङ्गमित्ये[3]वं[3] [4]षड्विधं लिङ्ग[4]मुच्यते ॥ २३ ॥

ए[5]वं[5] षड्विधं[6]भूतं स्यात् लिङ्गं[6] परमकारणम् ।
स्वशक्तिवैभवाच्चैव [7]स्वातन्त्र्या[7]ल्लीलयाऽपि च ॥ २४ ॥

शक्तयष्षड्विधा ज्ञेयाः षट्स्थलेषु समाहिताः ।
शक्तीनामधुना तासां सद्भावो वर्ण्यते क्रमात् ॥ २५ ॥

शान्त्यतीतोत्तरा श[8]क्तिः[8] चिन्मात्रानन्तविग्रहा ।
शिवासन्ना शिवा साक्षात् [9]शि[9]वस्यापि शिवंकरी ॥ २६ ॥

शान्त्यतीतोत्त[10]रा नाम चि[10]च्छक्तिरिति कीर्तिता ।
शान्त्यतीता परा शक्तिः शान्तिरेवादिसंज्ञि[11]ता[11] ॥ २७ ॥

इच्छाशक्तिश्च विद्या स्यात् प्रतिष्ठाज्ञानरूपिणी ।
निवृत्तिस्स्यात् क्रियाशक्तिः इति पर्यायसङ्गतिः ॥ २८ ॥

---

[1] त्यमि (अ). [2] व (अ). [3] व (क). [4] लिङ्गं षड्विध (क, य, क्ष). [5] वं हि (य, क्ष). [6] तं लि (य, क्ष). [7] स्वतन्त्रा (क). [8] क्ति (अ). [9] शै (क). [10] रा चि (अ), रा नाम नामश्चि (क). [11] त (अ), तः (क).

---

† अयं चार्धश्लोकः २३ श्लोकत्वेन मुद्रितपुस्तकेषु परिगणितः । स च क्रमः अत्राप्यादृतः ।

चिच्छक्तिश्च परा शक्तिः आदिशक्तिस्तथैव च ।
इच्छाज्ञानक्रियारू[1]पाः[1] शक्तयष्षड्विधाः स्मृताः ॥ २९ ॥

स्थलानां शक्तियुक्तानां षण्णामेषां पृथक् पृथक् ।
स्वरूपं लक्षणं चैव क्रमशो वर्ण्यतेऽधुना ॥ ३० ॥

*आद्यन्तशून्यममलं परिपूर्णमेकं
सूक्ष्मं परात्परमनामयमप्रमेयम् ।
भावैकगम्यमजडं शिवतत्त्वमाहुः
चिच्छक्तिसंस्फुरणरूपमहात्मलिङ्गम् ॥ ३१ ॥

ज्यो[2]तिः परं[2] निजमखण्डमतीन्द्रिया[3]र्थं[3]
ज्ञानोपलब्धममृतं परिणामबीजम् ।
सादाख्यतत्त्वमुदितं प[4]रया[4] स्वशक्त्या
प्राहुः प्रसादघनलिङ्गमुपाधिहीनम् ॥ ३२ ॥

साभ्यन्त[5]रङ्ग[5]बहिरङ्गममूर्ततत्त्वं
ज्योतिर्मयं पुरुषमक्षरतः परा[6]ख्यम्[6] ।
स्वात्मादिशक्तिघटितं मनसैव नित्यं
ध्यातव्य[7]माप्तमतयश्च[7]रलिङ्गमाहुः ॥ ३३ ॥

---

[1] पा (अ). [2] तिर्मयं (य, क्ष)· [3] र्थं (क)· [4] यो: (क). [5] रं स (अ). [6] ख्यः (क). [7] रूपमिति च (क).

---

* अत्र ' वसन्ततिलकं वृत्तं ' इति एतत्पद्यारम्भे वृत्तनिर्देशः कृतः ।

विद्याकलाकलितरूपसुशोभमानं
दि[1]व्यं[1] प्रभापटलमेकमुखं प्रशान्तम् ।
इच्छास्वशक्तिपरिजृम्भितमू[2]र्ति[2]तत्वं
व्यक्ते ह्यहङ्कृतिपदे शिव[3]तत्त्व[3]माहुः ॥ ३४ ॥

स्वज्ञानशक्तिविभवोत्थितकर्तृतत्त्वं
सर्वोपदेशविधितन्त्रकृ[4]त[4]प्रतिष्ठम् ।
तेजोनिधिं परमपारसुखाम्बुराशिं
बुद्धेः पदे विनिहितं गुरुलिङ्गमाहुः ॥ ३५ ॥

कर्मात्मना सकलतत्त्वनिवासहेतोः
आधारभूतम[5]च[5]लं क्रियया स्वशक्त्या ।
चित्तेन धार्यमधिरूढनिवृत्तिमार्गं
ह्याचारलिङ्गमिति वेदविदो वदन्ति ॥ ३६ ॥

ए[6]व[6]मेव स्वरूपं च लक्षणं परिकीर्तितम् ।
महालिङ्गस्थलादीनां षडविधानां यथाक्रमम् ॥ ३७ ॥

किन्त्वेतेषां स्थलानां तु प्रादुर्भा[7]वे[7] प्रद[8]र्शि[8]ते ।
शिव एव स्वचिच्छक्त्या महालिङ्गस्थलं [9]भवेत्[9] ॥ ३८ ॥

तदुपासकरूपत्वादैक्यस्थलमभून्महत् ।
स्फुरणाद्वै पराश[10]क्तेः[10] महालिङ्गस्थले परे ॥ ३९ ॥

---

[1] व्य (क, य). [2] र्तं (य). [3] लिङ्ग (क, य, क्ष). [4] तं (अ).
[5] तु (अ, क). [6] क (क). [7] वः (क, य, क्ष). [8] इयं (क, य, क्ष).
[9] बभौ (क). [10] क्तिः (क),

प्रसादलिङ्गसंज्ञं तु प्रादुरासीन्महास्थलम् ।
तदुपासकरूपत्वात् शरणस्थलमाबभौ ॥ ४० ॥

*प्रादुर्भूते स्थले तस्मिन् आदिशक्तिप्रभावतः ।
[1]स्थलं च चरलिङ्गाख्यं[1] समुत्पन्नमनुत्तमम् ॥ ४१ ॥
तदुपासकरूपत्वात् प्राणलि[2]ङ्ग[2]स्थलं बभौ ॥

स्थलात्तस्मु[3]त्थि[3]तं ज्योतिर्मयं तस्मात्सुशोभनम् ।
शिवलिङ्गस्थलं साक्षात् इच्छाशक्तिप्रभावतः ॥ ४२ ॥
तदुपासकरूपत्वात् प्रसादिस्थलमुद्बभौ ॥

†महालिङ्गप्रसादाख्यलिङ्गं च चरलिङ्गकम् ।
शिवलिङ्गं तथा चैव गुरुलिङ्गं ततःपरम् ॥ ४३ ॥
आचारलिङ्गमित्येवं प्रवृत्तिस्सृष्टिमार्गतः* ।

‡[4]शिव[4]लिङ्गस्थ[5]ले[5] ज्ञानशक्तिस्फुरणयोगतः ।
उद्भूतकारणत्वेन [6]गुरु[6]लिङ्गाभि[7]धं[7] स्थ[8]लम[8] ॥ ४४ ॥
तदुपासकरूपत्वा[9]न्माहेश्वरमहास्थलम्[9] ।

---

[1] चललिङ्गस्थलं तत्र (क). [2] ङ्गि (य, क्ष). [3] चि (अ. क, य). [4] गुरु (अ). [5] लं (अ). [6] शिव (अ). [7] घे (अ). [8] ले (अ). [9] न्महेशस्थलम् (अ).

---

* एतच्चिह्नान्तर्गतो भागः 'अ. य, क्ष' प्रतिषु नास्ति ; परन्तु कर्णाटटीकाभूषित 'अ' प्रतौ टीकामात्रं वर्तते ; 'क' प्रतौ कर्णाटटीकायुतं मूलं च दृश्यते ।

† एतच्चिह्नान्तर्गतो भागः 'अ' प्रतौ नास्ति ।

‡ अत्र प्रसादादिस्थललक्षणनिरूपणात्परे प्रतिलक्षणं अर्धश्लोकः एकैकः निवेशितः ग्रन्थकृता । ते अर्धश्लोकाः च श्लोकसङ्ख्यापरिगणने न गणिताः ।

* गुरुलि[1]ङ्गस्थले तस्मिन्[1] क्रियाशक्तिः [2]प्रभावतः[2] ।
[3]स्थलमाचारलिङ्गाख्यमुदभूदुत्तमोत्तमम्[3] ॥ ४५ ॥
तदुपासकरूपत्वात् भक्तस्थलमजायत ।

महालि[4]ङ्गं[4] प्रसादा[5]ख्यं[5] लिङ्गं च चरलिङ्गकम् ।
शिवलिङ्गं तथा चैव गुरुलिङ्गं ततःपरम् ॥ ४६ ॥
आचारलिङ्गमित्ये[6]व[6] प्रवृत्ति[7]स्सृ[7]ष्टिमार्गतः ।*

एवं लिङ्गस्थलं प्रोक्तं षड्वि[8]धं तु[8] समासतः ।
सन्ति भेदोपभे[9]दा[9]श्च प्रत्येकं स्थलमत्र हि ॥ ४७ ॥

एतद्यो वेद [10]सोऽ[10]विद्याग्रन्थि विकिरति प्रभुः ।
शिवसिद्धान्तकं तन्त्रं शिवाद्वैतं शिवं पदम् ॥ ४८ ॥

इ[11]त्य[11]नुभवसूत्रे †शिवसिद्धान्ततन्त्रे† षट्स्थलनिर्णये
लिङ्गस्थलनिरूपणं नाम तृती[12]याधिकरणं
‡समाप्तम्[12]‡

---

[1] ङ्गात् (अ). [2] शक्तिस्फुरणमात्रतः (अ). [3] आचारलिङ्गसंज्ञं [illegible] स्थलं जातं सुशोभनम् (य, क्ष). [4] ङ्ग (अ). [5] ख्य (य, क्ष). [6] वं (य, क्ष) [7] सृ (य, क्ष). [8] धा (क). [9] दङ्ग (क). [10] सा (अ, क). [11] ति[illegible] शिवा (क्ष). [12] योऽध्यायः (अ).

* एतच्चिह्नान्तर्गतो भागः ' क ' पुस्तके नास्ति ।
† एतच्चिह्नान्तर्गतो भागः ' य, क्ष ' पुस्तकयोर्नास्ति ।
‡ एतच्चिह्नान्तर्गतो भागः ' क ' पुस्तके नास्ति ।

अङ्गस्थलनिरूपणम्

चतुर्थाधिकरणम्

वक्ष्ये सङ्क्षेपमात्रेण पुरा शम्भुप्र[1]बोधि[1]तम् ।
रह[2]स्यं[2] सारभूतार्थमङ्गस्थलनिरूपणम् ।। १ ।।

अनाद्यन्तमजं लिङ्गं तत्प[3]द[3] परमं प्रति ।
यद्गच्छति महाभक्त्या तदङ्गमिति निश्चितम् ।। २ ।।

अं भवेत्परमं [4]ब्रह्म[4] तद्गतं तत्परायणम् ।
अङ्गस्थलमिति प्राहुः अङ्गतत्त्वविशारदाः ।। ३ ।।

अमिति ब्रह्म सन्मात्रं गच्छतीति गमुच्यते ।
रूप्यतेऽङ्गमिति प्राज्ञैः अङ्गतत्वविचि[5]न्त[5]कैः ।। ४ ।।

---

[1] चोदि (अ, य, क्ष). [2] स्य (क). [3] रं (य, क्ष). [4] तत्त्वं (अ, क, क्ष). [5] त्य (अ).

---

* सर्वप्रतिषु 'अनाद्यनन्तमजं लिङ्गं' इत्येव पाठो वर्तते । अत्र "अनाद्यनन्तं लिङ्गं स्यात्" इति पाठ आदरणीयो भवेत् चेत् स्वरसस्स्यात् ; यतः— लिङ्गं अनादि अनन्तं च । यद्यपि न विद्यते आदिः अन्तः यस्य स इति बहुव्रीहौ कृतायां स एवार्थः प्रतिपद्यते ; तथापि तदानीं अजं इत्यस्य व्यर्थं तैव ...यतस्तदर्थस्य अनाद्यनन्तमित्यनेनैवोपपत्तेः ।

†अङ्गस्थलं त्रिधा ज्ञेयं आचार्यैस्सूक्ष्मदर्शिभिः ।
योगाङ्गं प्रथमं प्रोक्तं भोगाङ्गं तु द्वितीयकम् ॥
त्यागा[1]ङ्गं तु[1] तृतीयं स्यात् एवमेव त्रिधा भवेत् ॥ ५ ॥

शिवयोगसुखावाप्त्या योगाङ्गमिति गीयते ।
शिवेन सह भोगेन भोगाङ्गमिति कथ्यते ॥ ६ ॥
संसारभ्रान्तिसन्त्यागात् त्यागाङ्गमिति [2]कथ्य[2]ते ।
योगाङ्गं कारणं प्रोक्तं भोगाङ्गं सूक्ष्ममुच्यते ।
त्यागाङ्गं स्थूलमित्युक्तं एवं भेदोऽभेदतः ॥ ७ ॥

सुषुप्त्यवस्था योगाङ्गं भोगाङ्गं [3]स्वापना[3]भिधा ।
जाग्रदित्युदितावस्था त्यागाङ्गमिति [4]लक्ष्य[4]ते ॥ ८ ॥

योगाङ्गं प्राज्ञ एव स्यात् भोगाङ्गं तैज[5]सो[5] भवेत् ।
त्यागाङ्गं विश्व एव स्यात् परमार्थनिरूपणे ॥ ९ ॥

इत्येवं त्रिप्रका[6]रेण[6] प्रोक्तमङ्गस्थलं [7]भवे[7]त् ।
प्रत्येकं पृथगर्थत्वात् साम्प्रतं प्रोच्यते द्विधा ॥ १० ॥
योगाङ्गमै[8]क्यं[8]शरणस्थलमित्युभयं भवेत् ।
प्राणलि[9]ङ्गि[9]प्रसादीति द्वयं भोगाङ्गमिष्यते ॥ ११ ॥

माहेश्वरस्थलं भक्तस्थलमित्युभयं [10]भवेत्[10] ।
त्यागाङ्गं च भवत्ये[11]वं[11] प्रोच्यते [12]पा[12]रमा[13]र्थि[13]कैः ॥ १२ ॥

---

[1] ङ्गं क). [2] वक्ष्य (अ, य, क्ष). [3] स्वप्ना (अ). [4] व (क).
[5] सा (क). [6] रैस्तत् (य, क्ष). [7] क्रमात् (क, य, क्ष). [8] क्य (अ).
[9] ङ्ग (अ, क). [10] तथा (क). [11] वं (अ). [12] प (क). [13] र्थं (क).

---

† अत्र अङ्गस्थलादिस्थलभेदतल्लक्षणनिरूपणावसरे प्रतिस्थलं पद्याङ्कानुट्टङ्कितं अर्धं अर्धं पद्यं एतत्पूर्वमुद्रितप्रतिषु दृश्यते । स एव क्रमः अत्राप्यादृतः ।

कारणं [1]तु[1]भवेदै[2]क्यं[2]शर[3]णं तु[3] द्वयात्मकम् ।
सूक्ष्मं स्यात्प्राणलिङ्गीति प्रसादीत्युभयात्मकम् ।। १३ ।।
स्थू[4]लं[4] माहेश्वरं भक्तमिति स्याद् द्वितयात्मकम् ।।

प्राज्ञ एव भवेदैक्यस्थलं च शरणस्थलम् ।
तैज[5]सः[5] प्राणलि[6]ङ्गी[6] स्यात् प्रसा[7]दीति[7] तथैव च ।। १४ ।।
विश्वो माहेश्वरं भक्तस्थलं चैव भव[8]त्यपि[8] ।

ऐक्यं तु शरणं नाम प्राणलिङ्गि प्रसादि च ।
माहेश्वरं [9]भक्तमिति[9] क्रमात् षट्-स्थलमुच्यते ।। १५ ।।

स्थिरा यत्र [10]परा[10] भक्तिः विना संसृतिसङ्ग[11]तिः[11] ।
स्थलं तदेतदि[12]त्याहुः[12] स्थलशब्दार्थ[13]वे[13]दिनः ।। १५ ।।

भक्तिवैचित्र्यसंयोगपरिणामप्रभावतः ।
नामरूपक्रियाभिन्न षड्विधाङ्गस्थलं भवेत् ।। १७ ।।

*सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः
षडाहुरङ्गानि महेश्वरस्य* ।। १८ ।।

---

[1] हि (अ, क). [2] क्य (अ). [3] णेति (अ), णं त (क). [4] ल (क) [5] स (अ, य). [6] ङ्ग (क). [7] दे च (क). [8] त्युभे (य, क्ष). [9] च भक्तश्च (क). [10]यदा (क), स्थिता (य, क्ष) [11] तिम् (य, क्ष). [12] त्युक्त (क). [13]वा (श, य, क्ष).

---

* एतच्चिह्नान्तर्गतः श्लोकः ‘ य ’ पुस्तकमात्रे दृश्यते ।

षट्-स्थलेषु प्रविश्यैषा भक्तिः षड्विधरूपिणी ।
क्रमात्प्रवर्तते तत्तल्लक्षणोपाधिभेदतः ॥ १९ ॥

मधुरादिषु यत् षट्सु प्रविश्य सलिलं यथा ।
तत्तदाकारतो भाति तथा भ[1]क्तिः[1] स्थले स्थले ॥ २० ॥

षड्विधाकारतो भि[2]न्ना[2] भक्तिस्तस्साक्षाच्छि[3]वात्मिका[3] ।
षण्णामैक्यादिभक्तान्तस्थलानां वर्तते पदे ॥ २१ ॥

यथा शक्तिर्म[4]हालिङ्गा[4]द्याचारान्तेष्ववस्थिता ।
त[5]थै[5]वैक्यादिभक्तान्तेष्वियं भक्तिरवस्थिता ॥ २२ ॥

भक्तिस्समरसा[6]कारा[6] प्रथमा परिगीयते ।
आनन्दाकारतो भाति द्वितीया भक्तिरुत्तमा ॥ २३ ॥

तृतीयानुभवाकारा भक्तिर्भव[7]ति शाश्वती[7] ॥
चतुर्थी परमा भक्तिरवधानात्मिका मता ॥
पञ्चमी नै[8]ष्ठि[8]की[8] भक्तिः ष[9]ष्ठी[9] सद्भक्तिरीरिता ॥ २४ ॥

*[[10]षोढा[10]] भक्तिसमेतानां अङ्गानामनुपूर्वतः ।
पृथक्-लक्षणसद्भावस्थितिरत्र निगद्यते ॥ २५ ॥

---

[1] क्ति (अ). [2] न्नः (क). [3] त्मकः (क). [4] हत्संज्ञा (अ)
[5] दै (क). [6] र (अ). [7] विनाशिनी (क, य, क्ष). [8] का (अ, क, य)
[9] ष्ठिः (अ). [10] षड्धा (अ, क, य, क्ष).

---

* 'षड्-धा' इति अस्वरसः सर्वपुस्तकपाठः परित्यक्तः ।

*नाहं त्वमप्रतिमशब्दविभेदवृत्तिः
न प्राणदेहमनइन्द्रियभौतिकानि ।
सर्वं भ्रमात्मकमिदं मयि नेति भावा-
दैक्यस्थलं समरसं सुखरूपमाहुः ।। २६ ।।

ज्ञानप्रकाशबलतः स्वयमेव लिङ्गं
देहेन्द्रियादि मम रूपमिति प्रबु[1]ध्य[1] ।
यु[2]क्ते[2] समस्तविषये सति यद्विशुद्धं
तत्प्रा[3]हु[3]राग[4]म[4]विदः शरणस्थलं हि ।। २७ ।।

प्राणेन्द्रियादिषु ममाहमिति प्रमोहं
सम्भ्रान्तिसिद्धमपहाय समस्तमेतत् ।
लिङ्गे विधाय मनसा यदनुप्र[5]युक्तं[5]
तत्प्राणलिङ्गि सुचरस्थलमाहुरार्याः ।। २८ ।।

आत्मोपभो[6]ग[6]विषयाणि हि सावधानं
द्रव्याण्यहङ्कृति[7]मि[7]तैर[8]खि[8]लैः स्ववर्गैः ।
लिङ्गे समर्प्य बहुशो लभते प्रसादं
यत्तत् प्रसादि गदितं गुरुभिः स्थलं स्यात् ।। २९ ।।

---

1 द्धा (क). 2 क्ति (क). 3 ह (क). 4 वि (क). 5 सक्त (अ), शक्त-(क), युक्त (क्ष). 6 ग्य (क). 7 म (क). 8 न (क).

---

* "नाहं" इत्येतत्पद्यारम्भे—"वसन्ततिलकं वृत्तम्" इति 'अ' पुस्तके, 'वृत्तम्' इति 'क' पुस्तके च पद्यस्यास्य वृत्तनिर्देशो दर्शितः ।

आस्तिक्यबुद्धिनियमव्रतसत्यधर्म-
शौचादिलक्षणपरिस्फुटसच्चरित्रम् ।
लिङ्गै[1]क्यनैष्ठि[1]कतया सह वीरवृत्तं
माहेश्वरस्थलमिति प्रवदन्ति सन्तः ॥ ३० ॥

मिथ्यैव सत्यमिव भा[2]न्तमिमं[2] शरीरं
प्राणार्थजा[3]त[3]मिति तत्र निवृत्तचित्तम् ।
भक्तिक्रियाचरणयैव [4]ततो[4] विरक्तं
भक्तस्थलं भवविकारविदूरमाहुः ॥ ३१ ॥

एवमेव क्रमात्प्रोक्तमैक्यादीनां सुवर्चसाम् ।
षड्विधाश्रमिणामेषां पृथगाचारलक्षणम् ॥ ३२ ॥

आवि[5]र्भूतेर[5]थैतेषां ईषद्भेदः प्रद[6]र्श्य[6]ते ।
आत्म[7]नाऽऽ[7]काशसम्भूतिः आकाशाद्वायुसम्भवः ।
वायोरग्निसमुत्पत्तिः अग्नेरापि उदाहृ[8]तः[8] ॥ ३३ ॥

अ[9]द्भ्यः पृथिव्याः[9]सम्भूतिः लक्षणै[10]क्य[10]प्र[11]कार[11]तः ।
† ऐक्यस्थलादिभक्तान्तस्थलसम्भूतिरीरिता † ॥ ३४ ॥

---

[1] कनैष्टि (अ), क्यानिष्ठि (क). [2] भातमिदं (अ, य, क्ष), भाति इदं (क). [3] ल (क). [4] सदा (अ, य, क्ष). [5] र्बभूवा (क). [6] र्शि (अ). [7] न्या न्या (अ), मा (क). [8] ताः (क, य, क्ष). [9] द्भः पृथ्वि (अ), द्भयः पृथिवी (क), अद्भयस्तु पृथ्वी (य, क्ष). [10] क (क). [11] भाव (अ, य, क्ष).

---

*'अद्भ्यः पृथिव्या सम्भूतिः' इति स्वरसः पाठः युक्तः ।
† एतच्चिह्नान्तर्गतः पद्यार्धभागः 'क'पुस्तके न दृश्यते ।

ऐक्यादिभक्तपर्य[1]न्ता[1]श्रमिणां षट्स्थलात्मनाम् ।
अङ्गानामधुना तेषां अङ्गलक्षणमुच्यते ॥ ३५ ॥

आत्माङ्गमैक्यमेव स्यात् व्योमाङ्गं शरणस्थलम् ।
वा[2]य्व[2]ङ्गं प्राणलिङ्गि स्यात् अनला[3]ङ्गं[3] प्रसादि च ॥ ३६ ॥

†माहेश्वरं जलाङ्गं स्यात् भक्तं भूम्यङ्गमिष्यते ।
*बिन्दुनादकलाभेदात् त्रिविधानि विलोमतः ।
षट्-स्थलानि विभक्तानि द्वितयं द्वितयं क्रमात्* ॥ ३७ ॥

‡ शरीरप्राणजीवानां त्रयाणां भेदतः क्रमात् ।
विलोमतो विभक्तानि षट्स्थलान्युभयोभयम्‡ ॥ ३८ ॥

षट्स्थलानि विभागेन द्विविधानि परस्परम् ।
ज्ञानात्मकतया त्रीणि क्रियात्मकतया तथा ॥ ३९ ॥

ज्ञानात्मकस्थलं [4]ह्यै[4]क्यं शरणं प्राणलि[5]ङ्गि च[5] ।
क्रियात्मकं प्रसादि स्यात् माहेश्वरमथापरम् ॥ ४० ॥

ऐक्यं[6]तु[6]शरणं नाम प्राणलिङ्गि प्रसादि च ।
माहेश्वरं भक्तमिति प्रवृत्तिस्सृष्टिमार्गतः ॥ ४१ ॥

---

1 न्त (अ). 2 य्वा (अ). 3 ङ्ग (अ). 4 ऐक्यं (अ), ह्यैव (क). 5 ङ्गकम् (अ, क्ष). 6 च (य, क्ष).

---

* एतच्चिह्नान्तर्गतो भागः 'क, य, क्ष' प्रतिषु मात्रमुपलभ्यते ।

† अत्र षट्स्थलविभागवासरे अङ्कानुट्टङ्कितः अर्धश्लोकः मुद्रित प्रतौ दृश्यते । स च क्रमः अत्राप्यादृतः ।

‡ एतच्चिह्नान्तर्गतो भागः 'य, क्ष' प्रत्योरेव दृश्यते ।

एवमङ्गस्थलं प्रोक्तं [1]षड्विधं तु समासतः[1] ।
इतः परं[2] न[2] प्रवक्तव्यं शेषोऽन्यो ग्रन्थविस्तरः ॥ ४२ ॥

एतद्यो वेद [3]सौ[3]ऽविद्याग्रन्थिं विकिरति प्रभुः ।
शिवसिद्धान्तकं तन्त्रं शिवाद्वैतं शिवं पदम् ॥ ४३ ॥

इ[4]त्य[4]नुभवसूत्रे *शिवसिद्धान्ततन्त्रे* षट्स्थलनिर्णये
अङ्गस्थलनिरूपणं नाम चतुर्थाधिकरणं
[5]समाप्तम्[5]

———o———

[1]मयाषड्विधरूपतः (क, य, क्ष). [2] प्र (अ, क) [3] सा (क). [4] ति वातुलोत्तरतन्त्रे शिवा (य, क्ष). [5] सम्पूर्णम् (य, क्ष).

* एतच्चिह्नान्तर्गतो भागः 'य, क्ष' पुस्तकयोः न दृश्यते ।

लिङ्गाङ्गसंयोगविधिः

पञ्चमाधिकरणम्

---

*[1]अथे[1]श्वरेणोक्तमतीव गुह्यं
देव्या कृतप्रश्नसुनिश्चितार्थम् ।
गुरूपदेशानुभवप्रसिद्धं
लिङ्गाङ्गसंयोगविधिं प्रवक्ष्ये ॥ १ ॥

शिव एव [2]भवेल्लिङ्गं आत्मैवा[3]ङ्गस्थलं भवेत्[3] ।
तयोश्शिवात्म[4]नो[4]स्सम्यक् यो[5]गस्स[5]योग एव हि ॥ २ ॥

आत्मा[6]यं[6] केवलश्शु[7]द्धः[7] शिवस्यांशस्सदाऽमलः ।
नित्यो निरञ्जनश्शान्तः तस्मादात्मा [8]स्वयं शिवः[8] ॥ ३ ॥

सोऽयमात्मा शिवाङ्गं स्यात् शिवेनाङ्गीकृतत्वतः ।
सर्वज्ञत्वादिभेदैश्च शिवाङ्ग[9]मिद[9]मिष्यते ॥ ४ ॥

---

[1] आनन्दे (क). [2] स्त्वंध लि (क). [3] ङ्गं भवेत् खलु (अ, क).
[4] नः (य). [5] गं स (अ). [6] नु (क). [7] द्ध (अ, य). [8] शिवस्स्वयम् (क).
[9] मय (अ, क).

---

* अत्र अथेति पद्यारम्भात् प्राक् अस्यैव पद्यस्य वृत्तनिर्देशः--'अर्धसमं वृत्तं'' इति 'अ, क' पुस्तकयोर्दृश्यते ।

सर्वज्ञ[1]त्वं[1] च तृप्तित्वं तथानादिप्रबोध[2]तः[2] ।
स्वतन्त्रतापि चालुप्तशक्तितानन्तशक्तिता ॥ ५ ॥
†इत्येतैर्लक्षणैष्षड्भिः शिवाङ्ग[3]मिति[3] लक्ष्यते ।†

तस्मादङ्गस्थलं साक्षात् आ[4]त्मैवा[4]यं [5]न[5] संशयः ।
लिङ्गस्थ[6]लं[6] शि[7]वस्सा[7]क्षात् सत्यमेव मयोदितम् ॥ ६ ॥

यथा लि[8]ङ्ग[8]स्थ[9]लं[9] शक्त्या स्वीयया बहुधा भवेत् ।
तथा चाङ्गस्थलं भ[10]क्त्या[10] स्वीयया बहुधा भवेत् ॥ ७ ॥

यद्यल्लिङ्गस्थलं साक्षात् शिवो भवति शक्तितः ।
तत्तदङ्गस्थलं साक्षात् आत्मा भवति भक्तितः ॥ ८ ॥

यद्यद्रूपमुपा[11]स्यत्वा[11]त् [12]शि[12]वो [13]भवति शक्तिमान्[13] ।
उपासकत्वत[14]श्चात्मा तत्तदाप्नो[14]ति भक्तिमान् ॥ ९ ॥

यद्यत्स्वरूपमा[15]द[15]त्ते पू[16]ज्य[16]त्वेन महेश्वरः ।
पूजकत्वेन चात्मा[17]यं तत्तद्रू[17]पमनुव्रजेत् ॥ १० ॥

यद्यत्स्वरूपमा[18]द[18]त्ते साध्यत्वात्परमेश्वरः ।
साधकत्वादसावात्मा तत्तदास्थाय तिष्ठति ॥ ११ ॥

---

[1] ता (य, क्ष). [2] ता (य, क्ष). [3] मपि (क). [4] त्मा (क), ह्यैवहि (य, क्ष). [5] न हि (क). [6] ल (क). [7] वं सा (क). [8] ङ्गं (क्ष). [9] ले (क्ष). [10] क्तं (क). [11] स्यं स्या (अ). [12] शिवत्वाच्छि (अ), जी (क). [13] व्रजते क्रमात् (अ). [14] स्साक्षात् तत्तद्व्रज (क) [15] ध (क, य, क्ष). [16] ज (अ, क). [17] यं एतद्द्रू (अ, क), नं तत्तद्रू (क्ष). [18] ध (क य, क्ष).

---

†एतच्चिह्नान्तर्गतो भागः अङ्कोट्टङ्कनरोहितः मुद्रितपुस्तके दृश्यते । स एवात्रं क्रम अत्राप्याहृतः ।

यद्यत्स्वरूपमा[1]द[1]त्ते गुरुत्वेनाम्बिकापतिः ।
शिष्यत्वेनायमात्मा च तत्त[2]दादाय वर्तते[2] ॥ १२ ॥

उपास्योपासकौ पूज्यपूजकौ साध्यसाधकौ ।
गुरुशिष्यौ शिवात्मानौ निग[3]द्ये[3]ते महात्मभिः ॥ १३ ॥

†अ[4]थ[4] संयोगसद्भाव उच्यते साम्प्रतं मया ।†

सम्यग्योगो हि संयोगो भवेल्लिङ्गाङ्गयोस्सदा ।
संयोग [5]एव[5] सायु[6]ज्य[6]रू[7]पा[7] मुक्तिर्न [8]संशयः[8] ॥ १४ ॥

तस्माल्लिङ्गाङ्गसंयोगात्परा मुक्तिर्न विद्यते ।
मु[9]क्तेः[9] परतरा भक्तिरिति स[10]त्य[10]परा श्रुतिः ॥ १५ ॥

†इतःपरं न वक्तव्यं बहुनोक्तेन किं फलम् ।

अ[11]तो[11] लिङ्गाङ्गसंयोगविधिरत्र प्रद[12]र्श्य[12]ते ।

वि[13]धिः[13] कर्तव्यरूपोपदेश इत्येव निश्चितः ।†

उपदेशप्रसिध्यर्थमाचार्यं भवतार[14]कम्[14] ।
शिवविद्याप्रदातारमविद्याग्रन्थिभेदकम् ॥ १६ ॥

शिवसिद्धान्ततन्त्रैककर्तारं परमं [15]शिव[15]म् ।
सदा लिङ्गाङ्गसंयोगपरायणमनामयम् ॥ १७ ॥

---

[1] ध (य, क्ष). [2] द्रूपमुपाश्रितः [3] च (अ, क). [4] तः (अ, क). [5] योग (क). [6] ज्यं (अ). [7] प (क, य, क्ष). [8] चापरा (य, क्ष) [9] क्तिः (अ, क). [10] त्या (अ). [11] था (क), [12] र्शा (क्ष). [13] धि (अ). [14] कः (अ). [15] पर (अ).

---

† मुद्रितपुस्तकमनुसृत्य एतच्चिह्नान्तर्गतभागद्वयं अङ्कानुटङ्कितं निक्षिप्तम् ।

†उपगच्छत्यसौ देही स्वाविद्याविनिवृत्तये ।†

सोऽयमात्मा [1]स्वयं[1] साक्षात् शिवस्यांशोऽपि तत्त्वतः ।
व्यवहारदशायां तु संसा[2]री[2]व प्रकाशते ॥ १८ ॥

संसारोऽविद्यया [3]चा[3]स्य सत्यवत्परिकल्पितः ।
देहेन्द्रियादिसङ्घातेऽहंममभ्रान्तिरूपतः ॥ १९ ॥

स्वस्मि[4]न्न[4]वस्थिताऽविद्यामोहितः पुरुषः स्वकम् ।
शि[5]वांश[5]त्वं स्व[6]कां श[6]क्तिमविज्ञाय स्वकर्मणा ॥ २० ॥
†सोऽहमित्यब्रवीद्देही गुरुं परमकारणम् ।†

गुरुस्तत्त्वमसीत्याह सत्यार्थं करुणानिधिः ।
*अविद्याकृतकं सर्व[7]मि[7]दं देहेन्द्रियादिकम् ॥ २१ ॥
†असत्यं भ्रान्तिसंसिद्धं सत्यव[8]त्परि[8] वर्तते ।†

[9]अविद्याकृतक[9]भ्रान्तिविनाशार्थमहो तव ।
नित्यं लिङ्गाङ्गसंयोगज्ञाननिष्ठत्वमावह ॥ २२ ॥

लिं नत्पदमाख्यातं अङ्गं त्वम्पदमीरितम् ।
संयोगोऽसिप[10]दं प्रोक्त[10]मनयोरङ्गलिङ्गयोः ॥ २३ ॥

---

1 शिवं (अ). 2 रे (क). 3 य (क). 4 न्ने (अ, य, क्ष). 5 व (अ).
6 कौ भ (क). 7 वि (क). 8 स्वयि (क, य, क्ष). 9 तस्मात्तत्कृतक (अ, य, क्ष). तस्मात्तत्प्रतते (क). 10 दप्रोक्त-(अ, य, क्ष), दं मृत्यु (क).

---

* 'अविद्याकृतक' इति २१ श्लोकोत्तरार्धभागः, तदुत्तरस्थाङ्कानुद्दङ्कित-श्लोकार्धभागश्च 'अ' पुस्तके नास्ति ।

† एतच्चिह्नान्तर्गताः एतत्पुटस्थाः भागाः, मुद्रितप्रतिषु श्लोकाङ्कानुद्दङ्किताः यथा दृश्यन्ते तथैवात्रापि ते निवेशिताः ।

*सन्मात्रं लिङ्गमाख्यातं चिन्मात्रं त्वङ्गमीरितम् ।
आनन्दमात्रमनयोस्संयोग इति कीर्तितः ।। २४ ।।

नादो लि[1]ङ्ग इ[1]ति प्रोक्तः बिन्दुरङ्गमितीरितः ।
कला संयोग इत्युक्ता तयोर्लिङ्गाङ्गयोस्तथा ।। २५ ।।

मन्त्रो लिङ्गमिति प्रोक्तः क्रिया त्वङ्गमितीरिता ।
क्रियामन्त्रप्रयोगस्तु संयोगो ह्यङ्गलिङ्गयोः ।। २६ ।।

अङ्गं प्रकृतिराख्यातं लि[2]ङ्गः[2] पुरुष ईरितः ।
तयोः प्रेरकभावेन संयोगः स्वयमीश्वरः ।। २७ ।।

†अकारो लि[3]ङ्गमि[3]त्युक्तः चोकारोङ्गमितीरितः ।
संयोगोऽयं मकारस्स्यात् प्रणवांशप्रभेदतः ।। २८ ।।

ह्रस्वस्यालिङ्गमेवाङ्गं दीर्घः प्लुतमतः परम् ।
तयोस्संयोग इत्येवं ओङ्कारेणाभिधीयते ।। २९ ।।

वागङ्गं लिङ्गमेवार्थः प्रतिपत्तिस्तयोस्सदा ।
संयोग इति विद्वद्भिः प्रोक्तो लिङ्गाङ्गयोगिभिः ।। ३० ।।

---

[1] ङ्गमि (क, य, क्ष)· [2] ङ्गं (क, य, क्ष)· [3] ङ्गः इ (अ, क),

---

* 'सन्मात्र'मिति पद्यमारभ्य 'अनुभवसूत्रं सूत्रं' इति ३२ तमपद्यान्तं यावत् 'अ' पुस्तके नास्ति ।

† 'अकारो लिङ्ग' इति श्लोकमारभ्य 'अनुभवसूत्रं सूत्रं' इति पद्यान्तं यावत् 'क' पुस्तके नास्ति ।

छायातपौ जीवशिवावसौ गुरुः
शिवोऽस्य शिष्यः खलु जीवसंज्ञिकः ।
लिङ्गं परं हृद्गगनं तदङ्ककं
प्राणानिलोऽयं शिवसूत्रमुच्यते ॥ ३१ ॥

अनुभवसूत्रं सूत्रं शिवसिद्धान्तसञ्ज्ञिकं तन्त्रम् ।
लिङ्गं षट्स्थलपरमब्रह्मैवेत्यत्र धारयेत्सततम् ॥ ३२ ॥

इत्युक्त्वा पुरुषस्यास्य देशिकः करुणाबलात् ।
चक्रे दीक्षां महाशैवीमविद्यापाशकृन्तनीम् ॥ ३३ ॥

दीयते लिङ्गसम्ब[1]न्धः[1] क्षीयते च मलत्रयम् ।
दीयते क्षीयते य[2]स्मात् सा[2] दीक्षेति निगद्यते ॥ ३४ ॥

सा दीक्षा परमा शैवी त्रिधा भवति निर्मला ।
एका वे[3]ध[3]ात्मिका साक्षादन्या मन्त्रात्मिका मता ॥ ३५ ॥

क्रियात्मिका परा काचित् एवमेव त्रिधा भवेत् ।
हस्तमस्तकसंयो[4]गात् छ[4]लाद्वे[5]धे[5]ति गीयते ॥ ३६ ॥

गुरुणोदीरिता कर्णे या सा [6]मान्त्री[6]ति कथ्यते ।
शिष्यपाणितले दत्ता या दीक्षा सा क्रि[7]योच्यते[7] ॥ ३७ ॥

पाशानशेषान् क[8]र्तर्या[8] छित्वा लिङ्गं समादिशेत् ।
कर्तरी शिवदीक्षा स्यात् यथा पाशान् छिनत्त्यसौ ॥ ३८ ॥

---

[1] न्धं (अ). [2] स्यास्सा (अ, क). [3] दा (अ, क). [4] गच्छ (अ, य, क्ष)
[5] दे (अ). [6] मन्त्रेति (अ, क). [7] क्रियात्मजा (अ). [8] र्त्तार्ये (अ).

कृत्वा शैवीं परां दीक्षां दत्वा वि[1]द्यां[1] शिवात्मिकाम् ।
छित्वाऽविद्याम[2]हा[2]पाशं कला[3]ध्वा[3]नं विचिन्तयेत् ॥ ३९ ॥

यथा कला तथा भावो यथा भावस्तथा मनः ।
यथा मनस्तथा दृष्टिः यथा दृष्टिस्तथा स्थलम् ॥ ४० ॥

सा कला परमा [4]सूक्ष्मा तत्वानां[4] बो[5]धिनी[5] मता ।
तामाकृष्य यथान्यायं लिङ्गे समुप[6]वे[6]शयेत् ॥ ४१ ॥

[7]सा[7] बाह्याभ्यन्तरं साक्षात् लिङ्गं ज्योतिः परं स्वकम् ।
तिले तैलमिवाभा[8]ति ह्य[8]रण्यामिव पावकः ॥ ४२ ॥

क्षीरे सर्पिरिव स्रोतस्यम्बुवत् स्थि[9]त[9]मात्मनि ।
तद्भा[10]व[10]लक्षणां भक्तिं सुसू[11]क्ष्मां परमामपि[11] ।
दर्शयामास शिष्यस्य *देशिकः* परमेश्वरः ॥ ४३ ॥

तस्मिन् दृष्टे परे लिङ्गे [12]नैष्क[12]ले निरुपाधिके ।
अस्य जीवस्य कर्माणि क्षीयन्ते सक[13]लानि वै[13] ॥ ४४ ॥

†अविद्याहृदयग्रन्थिर्भिद्यते शतधापि च ।
संशया बहुसङ्कल्पाश्छिद्यन्ते च सहस्रधा† ॥ ४५ ॥

---

[1] द्या (क). [2] दे (क). [3] ध्या (क). [4] सूक्ष्मा मन्त्राणां (अ). साक्षात् तत्वानां (क). [5] धवी (क). [6] दे (अक). [7] स (अ). [8] तम (अ, क). [9] त (अ, क्ष). [10] ग (क). [11] क्ष्मं परम् (क). [12] निःक (अ). [13] लैस्तथा (क), कलानि हि (क्ष).

---

* अयं भागः 'क' पुस्तके त्रुटेतातळे लुप्तः ।

† एतच्चिह्नान्तर्गतोऽर्धश्लोकः 'क' पुस्तके नास्ति ।

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ।
तच्छुभ्रं ज्योतिषां ज्योतिः तद्यदात्मविदो विदुः ।। ४६ ।।

ततस्तल्लिङ्गमस्याङ्गे शिष्यस्यामिततेजसः ।
गुरुस्संयोजयामास पूर्वोक्तेनैव वर्त्मना ।। ४७ ।।

तनुत्रयगतानादिमलत्रयमसौ गुरुः ।
दीक्षात्र[1]येण[1] निर्द[2]ग्ध्वा[2] लिङ्गत्रयमुपादि[3]शे[3]त् ।। ४८ ।।

यथा पुरत्रयं दग्धं युगपत्पुरवैरिणा ।
तथा मलत्रयं [4]द[4]ग्धं युगपद्देशिकात्मना ।। ४९ ।।

वेधा मन्[5]त्र[5]क्रियाका[6]रा[6] दीक्षा शैवी शिखा मता ।
त[7]च्छिखा[7] लिङ्गमित्युक्तं कर्ममायाणुवासना ।। ५० ।।

रूपं कर्पूरमाख्यातं तद्गन्धं [8]चाङ्गमी[8]रितम् ।
एतल्लिङ्गाङ्गसंयो[9]गः[9] शिखिकर्पूरयोगवत् ।। ५१ ।।

त्रिष्वङ्गेष्वस्य शिष्यस्य लिङ्गत्रयमयं गुरुः ।
संयुयोज त्रिधाभूतपरदीक्षाबलेन तु ।। ५२ ।।

योगाङ्गे भावलिङ्गं तु वेधा दीक्षाबलेन वै ।
मन्त्रदीक्षाबलेनैव भोगाङ्गे प्राणलिङ्गकम् ।। ५३ ।।

क्रियादीक्षाबलेनायं देशिक[10]स्तस्त्य[10]चिद्ध[11]नम्[11] ।
इष्टलिङ्गं तथा चैव त्यागाङ्गे समयोज[12]य[12]त् ।। ५४ ।।

---

[1] न (अ). [2] ह्य (अ). [3] श (क्ष). [4] ध (अ). [5] मनु (य, क्ष [6] र (अ क). [7] च्चैको (क). [8] न्धोऽङ्गमिती (य, क्ष). [9] ग (अ [10] स्सत्य (अ, क). [11] नः (अ; क,). [12] ये (य, क्ष).

योगाङ्गमात्म[1]नो[1]ङ्गत्वात् कारणाङ्गमितीरितम् ।
भोगाङ्गमन्तरङ्गत्वात् सूक्ष्माङ्गमिति [2]निश्चि[2]तम् ।। ५३ ।।
त्यागाङ्गं बहिरङ्गत्वात् स्थूलाङ्गमिति की[3]र्तितम्[3] ।

*जीवात्मा विश्व एव स्यात् अन्तरात्मा तु तैज[4]सः[4] ।
परमात्मा भवेत्प्राज्ञः इति तत्त्वविदो विदुः* ।। ५४ ।।

विश्वो जाग्रदवस्थायां स्वप्नाख्यायां तु तैज[5]सः[5] ।
प्राज्ञः सुषुप्त्यवस्थायां लिङ्गत्रयमुपासते ।। ५५ ।।

एकोऽयं पुरु[6]षो[6] विश्व[7] तै[7]ज[8]स[8]प्राज्ञरूपतः ।
सदा स्वा[9]ङ्गेषु[9] संयु[10]क्त[10]मुपास्ते लिङ्गमद्वयम् ।। ५६ ।।

†उपासनैव संयोगः संयोगो द्वैतसंलयः ।
द्वैतस्य विलयश्चैव निवृत्तिः परिकीर्तिता ।।
निवृत्तिस्सैव विश्रान्तिर्विश्रान्तिः परमं [11]सुखम्[11] ।।
स्फटिकस्वच्छयोर्दीपप्रभयोः [12]करकाम्भसोः[12] ।। ५७ ।।
कर्पूरगन्धयोर्वायु[13]न[13]भसोर्भोगयोगवत् ।।†

एवं लिङ्गाङ्गसंयोगविधिना स्वात्मनि स्थिता ।
बीजरू[14]पा[14] परा भक्तिः प्ररोहति समन्ततः ।। ५८ ।।

---

[1] स (अ). [2] संम (क). [3] र्थ्यते (अ). [4] सम् (क). [5] सम् (अ). [6] षं (क). [7] ते (य). [8] सः (अ, क). [9] ङ्गेषु (अ). [10] क्तो (अ). [11] पदम् (क, य, क्ष). [12] काश्मशाम्भवाः (क). [13] र्न (अ). [14] प (अ)

---

* एतच्चिह्नान्तर्गतोऽयं श्लोकः ' अ ' पुस्तके नास्ति ।

† एतच्चिह्नान्तर्गतः सार्धश्लोकद्वयभागः मुद्रितपुस्तकेषु ५७ सङ्ख्यात्वेन यथा परिगणितः तथैवात्रापि निविष्टः ।

आ[1]त्मा[1] क्षेत्रं भवेद्भक्तिः बीजं बीजी महेश्वरः ।
तस्मात् क्षेत्रस्य बीजस्य बीजि[2]नश्च[2] कदाचन ॥ ५९ ॥
वियोगो नेक्ष्यते क्वापि सदा संयोग एव हि ।

*अङ्गमात्मेति निर्णीतं लिङ्गं ब्रह्मेति निश्चितम् ।
अङ्गस्य हृदयं लिङ्गं लिङ्गस्य हृदयं [3]हि[3] तत् ॥
तयोः कथं वियोगस्स्यात् सदा संयोग एव हि ।
योगेन तु परा भक्तिः इति भक्तस्तु वैभवम् ॥ ६० ॥*

अ[4]स्याः[4] स्वरूपमद्भावात् सद्भक्तिरिति कीर्तिता ।
[5]त[5]द्भक्त्यैव [6]तथा[6] चा[7]स्या[7] भक्तस्थलमुपागतम् ॥ ६१ ॥

†आचारलिङ्ग[8]संयु[8]क्तमङ्गं भक्तस्थलं महत् ।
तत्र स्थिता सती भक्तिः सम्पूर्णा निजनिष्ठया ॥
नैष्ठिकी भक्तिरित्येव कीर्तिता भक्तितत्परैः ।
तया [9]मा[9]हेश्वरं नाम स्थलम[10]स्य स्वरूपतः[10] ॥ ६२ ॥†

‡गुरुलिङ्गसमायुक्तमङ्गं माहेश्वरस्थलम् ।
तत्र सन्निहिता भक्तिः नैष्ठिकी सावधानतः ॥ ६३ ॥
अवधानात्मिका भक्तिः इति प्रोक्ता महात्मभिः ।‡

---

[1] त्म (क). [2] नोऽस्य (क्ष). [3] तु (य, क्ष), [4] स्यां (अ). [5] स (अ, क). [6] त्वया (अ), दया (क). [7] स्य (क, य, क्ष). [8] मित्यु (अ). [9] म (अ). [10] स्याः समागतम् (अ), स्य समागतम् (क).

---

* एतच्चिह्नान्तर्गतो भागः 'अ' पुस्तके नास्ति ।

† एतच्चिह्नान्तर्गतौ सार्धश्लोकभागौ मुद्रितपुस्तकवत् ५ सङ्ख्याश्लोकत्वेन तथा ६२ संङ्ख्याश्लोकत्वेन चात्र निदिष्टौ ।

‡ एतच्चिह्नान्तर्गतौ श्लोकद्वयभागौ एकसंख्यात्वेन यथा मुद्रितपुस्तके निविष्टौ तथात्रापि निविष्टौ ।

भक्त्या तयास्य जीवस्य प्रसादिस्थलमागतम् ।
शिवलिङ्गसमायुक्तं प्रसादिस्थलमागतम् ॥ ६४ ॥

तत्रैव [1]सु[1]स्थिता भक्तिः अवधानात्मिका शुभा ।
स्वानुभूतिनिबन्धेन कीर्तिताऽनुभवात्मिका ॥ ६५ ॥

प्राणलिङ्गिस्थलं चास्य तया भक्त्या समागतम् ।
अङ्गं च चरलिङ्गेन संयुक्तं प्राणलिङ्गि [2]त[2]त् ॥ ६६ ॥

तत्र स्वानुभवाकारा भक्तिरानन्दयोगतः ।
प्रोक्ताऽनन्दात्मिका भक्तिः इति वेदान्तवेदिभिः ॥ ६७ ॥

अस्यात्मनस्तया भक्त्या शरणस्थलमागतम् ।
प्रसादलिङ्गसंयुक्तं अङ्गं [3]स्याच्छ[3]रणस्थलम् ॥ ६८ ॥

तत्र प्रतिष्ठिता साक्षात् भक्तिः आनन्दरूपिणी ।
सामरस्यप्रभावेन प्रोक्ता समरसात्मिका ॥ ६९ ॥

ऐक्यस्थलं तया चास्य चेतनस्य समागतम् ।
महालिङ्गसमायुक्तमङ्ग[4]मैक्यस्थलं परम् ॥ ७० ॥

†तत्रैवावस्थिता भक्तिः स्वस्मिन् स्वयमवस्थिता ।
षडङ्गयोगमार्गेण साधयत्ययमीश्वरम् ॥ ७१ ॥
युगपत् षट्स्थलावा[4]प्तिः सा[4]धकस्यास्य सिध्यति ।†

[1] सा (अ, क). [2] य (अ, क, क्ष). [3] हि श (य, क्ष). [4] सिसा (अ).

† एतच्चिह्नान्तर्गतसार्धैकश्लोकभागः मुद्रितप्रतिवत् ७२ सङ्ख्याकश्लोकत्वेन निर्दिष्टः ।

साधकत्वात् षट् प्रपद्यन्त [1]इत्या[1]चारादिस्थलानि [2]वै[2] ।
भ[3]क्ता[3]दीनि प्रपद्यन्ते साधकत्वात् स्थलानि [4]षट्[4] ॥ ७२ ॥

साध्यः परशिवः साक्षात् आचारादिषु षट्सु च ।
भ[5]क्ता[5]दिषु स्थले[6]ष्व[6]स्मा साधकोऽयं प्रकीर्त्यते ॥ ७३ ॥

*आचारलिङ्गं गुरुरूपलिङ्गं
शिवाख्यलिङ्गं चरनामलिङ्गं ।
प्रसादलिङ्गं च महात्मलिङ्गं
निवृत्तिमार्गेण षडाहुरार्याः ॥ ७४ ॥

भक्तं माहेश्वरं [7]चैव[7] प्रसादि प्राणलिङ्गि च ।
शरणस्थलमैक्यं हि निवृत्ति[8]र्लय[8]मार्गतः ॥ ७५ ॥

†ब्रह्मा हरिश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
साक्षात्परशिवश्चेति क्रमशः षट्स्थलात्मकाः ॥ ७६ ॥

एवं लिङ्गाङ्गसंयोगविधिरत्र प्रकीर्तितः ।
अस्माभिरादरेणैव शिवप्रो[9]क्तो[9] यथा तथा ॥ ७७ ॥

---

1 आ (अ). 2 षट् (क). 3 क्त्या (य). 4 वै (य, क्ष).
5 क्त्या (क, य, क्ष). 6 स्वा (अ). 7 नाम (अ). 8 ल (य, क्ष).
9 क्ता (अ).

---

* एतच्चिह्नाङ्कित 'आचारेति' पद्यात् पूर्वं — 'उपजातिवृत्तं इन्द्रमाला च' इति वृत्तनिर्देशः कृतः ।

† ब्रह्मेति पद्यमिदं 'अ, क' योर्न दृश्यते ।

एतद्यो वे[1]द सो[1]ऽविद्याग्रन्थिं विकिरति प्रभुः ।
शिवसिद्धान्तकं तन्त्रं शिवाद्वैतं शिवं पदम् ॥ ७८ ॥

इत्यनुभवसूत्रे *शिवसिद्धान्ततन्त्रे षट्स्थलनिर्णये*
लिङ्गाङ्गसंयोगविधिर्नाम पञ्चमाधिकरणं
†समाप्तम्†

---

[1] त्ति सो (अ, क्ष), त्ति सा (य)·

* 'शिवसिद्धान्ततन्त्रे' इति 'य' पुस्तके, 'षट्-स्थलनिर्णये' इति 'क्ष' पुस्तके च न स्तः ।

† एतच्चिह्नान्तर्गतो भागः 'य' ग्रन्थे न दृश्यते ।

सर्वाङ्ग-लिङ्ग-साहित्यनिरूपणम्

षष्ठाधिकरणम्

अथ श्रीशम्भुना प्रोक्तमनन्तार्थप्रकाशकम् ।
सर्वाङ्गलिङ्गसाहित्यं वक्ष्ये सङ्क्षेपरूपतः ॥ १ ॥

सर्वेष्वङ्गेषु सर्वत्र सर्वदा सर्वतोमुखम् ।
लिङ्गं गुरूपदेशेन सुप्रतिष्ठितमात्मनि ॥
प्रकाशते ततोऽमुष्य [1]चेतन[1]स्य निरन्तरम् ।
सर्वाङ्गलिङ्गसाहित्यं प्रोच्यते लिङ्गतत्परैः ॥ २ ॥

ए[2]क[2]मेव परं लिङ्गमङ्गेऽस्मिन् सुप्रतिष्ठितम् ।
सर्वतोमुखमाभाति नामरूपक्रियात्मना ॥ ३ ॥

इष्टलिङ्गं तु बाह्याङ्गे प्राणलिङ्गं तथान्तरे ।
भावलिङ्गं [3]तथैवास्मिन् आत्माङ्गे सु[3]प्रतिष्ठितम् ॥ ४ ॥

हृदयाङ्गे महालिङ्गं श्रोत्राङ्गे तु प्रसादकम् ।
त्वगङ्गे चरलिङ्गं [4]तु[4] दृगङ्गे शिवलिङ्गकम् ॥ ५ ॥

जिह्वाङ्गे गुरुलिङ्गं तु नासिकाङ्गे तथैव च ।
आचारलिङ्गमश्रान्तं सुप्रतिष्ठितमेव हि ॥ ६ ॥

---

[1] चैतन्य (क); [2] व (अ, क). [3] सदैवात्मनङ्गेऽस्मिन् अरे! (अ); सदैवास्मिन्नात्माङ्गेषु (क). [4] च (अ).

यथा ज्ञानेन्द्रियाङ्गेषु क्रमाल्लिङ्गं प्रतिष्ठितम् ।
तथा कर्मेन्द्रियाङ्गेषु क्रमाल्लिङ्गं प्रतिष्ठितम् ॥ ७ ॥

श्रोत्रवाचोर्न भेदोऽस्ति शब्दस्य वचनस्य च ।
स्प[1]र्शादानद्व[1]योस्तद्वत् भेदो न [2]हि करत्वचोः[2] ॥ ८ ॥

न नेत्रपादयोर्भेदो [3]न जिह्वगुह्ययोस्तथा[3] ।
[4]न रसानन्दयोर्भेदो[4] न जिह्वागु[5]ह्य[5]योस्तथा ॥ ९ ॥

नासिकागुदयोर्भेदो नास्ति गन्धविसर्गयोः ।
अस्ति चेदप्रमाणं स्यात् श्रुतिस्सत्यार्थवादिनी ॥ १० ॥

श्रोत्रस्य वाचः शब्दस्य विभोर्व्योम्नस्तथैव च ।
ईश्वरीमीश्वरस्यैनां इशानाख्यां विदुर्बुधाः ॥ ११ ॥

त्वक्पाणिस्पर्शवायूनां ई[6]श्वरीं[6] मूर्तिमैश्वरीम् ।
पुरुषाख्यां विदुः पूर्वे पुराणागमवेदिनः ॥ १२ ॥

चक्षुषश्चरणस्यापि रूपस्याग्नेस्तथैव च ।
अघोरा[7]ख्या[7]मधिष्ठात्रीं मूर्तिमाहुर्मनीषिणः ॥ १३ ॥

रसनाया [8]उ[8]पस्थस्य रसस्यापां तथैव च ।
ईश्वरीं नामदेवाख्यां मूर्तिं मुनिवरा विदुः ॥ १४ ॥

1 र्शदानद्व (क), र्शमादानद्व (य, क्ष). 2 त्वत्करद्वयोः (अ). 3 रूपस्य गमनस्य च (अ, य, क्ष). 4 भेदो नानन्दरसयोः (य, क्ष). 5 ह्व (क). 6 री (अ). 7 ख्य (अ). 8 तू (क)

* एतच्चिह्नान्तर्गतो भागः ‘ क ’ पुस्तके न दृश्यते ।

घ्राणस्य चैव पायोश्च गन्धस्य च भुवस्तथा ।
सद्योजाताह्व[1]यां[1] मूर्तिं ईश्वरीं सम्प्र[2]वक्ष[2]ते ।। १५ ।।

ज्ञानकर्मा[3]त्म[3]नां [4]खा[4]नां आश्र[5]यं[5] हृदयं भवेत् ।
आश्रयत्वात्स्वनैर्मल्यात् ज्ञानकर्मोभयात्मकम् ।। १६ ।।

इन्द्रियाणां तु सर्वेषां अवकाशप्रदत्वतः ।
हृदयाकाश इत्येव प्रोच्यते [6]मुनिस[6]त्तमैः ।। १७ ।।

स्थूलाङ्गे स्थूलरूपेण सूक्ष्माङ्गे सूक्ष्म[7]रूप[7]तः ।
कारणे कारणत्वेन तिष्ठन्त्येतानि खानि हि ।। १८ ।।

तेष्वेषु खेषु सर्वेषु लिङ्गं सत्यादिलक्षणम् ।
गुरूपदेशसंसिद्धं भासते सर्वतोमुखम् ।। १९ ।।

एतल्लिङ्गमुखं [8]य[8]त्र दृश्यते सू[9]क्ष्म[9]दर्शिभिः ।
यदामनन्ति वेदाश्च तपांसि नियमस्तथा ।। २० ।।

हृदयं हृदयस्येति श्रोत्रं श्रोत्रस्य सर्वदा ।
[10]वा[10]चो वाक त्वक् त्वचः पाणिः पाणेश्चक्षुश्च चक्षुषः ।। २१ ।।

पादः पादस्य जिह्वा[11]या[11] जिह्वा गुह्यस्य गुह्यकम् ।
नासिका नासिकायाश्च पायोः पायुरिति स्थितिः ।। २२ ।।

---

1 यं (क). 2 वक्ष्य (क्ष). 3 त्मा (क्ष). 4 भा (क). 5 यो (क). 6 मतिम (य, क्ष). 7 तत्त्व (क). 8 ह्य (अ, क). 9 थें (अ). 10 व (क). 11 यां (अ).

तल्लिङ्गमुखमित्याहुः शिवसिद्धान्ततान्त्रिकाः ।
प्रत्येकं लिङ्गम[1]स्यैव[1] मुखं वक्ष्ये पृथक् पृथक् ॥ २३ ॥

घ्राणस्य घ्राणमाचारलिङ्गस्य मुखमुच्यते ।
जिह्वायाश्च तथा जिह्वा गुरुलिङ्गमुखं भवेत् ॥ २४ ॥

चक्षु[2]श्च चक्षुरेश्येतत्[2] शिवलि[3]ङ्ग[3]मुखं भवेत् ।
†मुखं च शिवलिङ्गस्य नेत्रं नेत्रस्य कथ्यते† ॥ २५ ॥

त्वचस्त्वक् चररूपस्य लिङ्गस्य मुखमुच्यते ।
मुखं प्रसादलि[4]ङ्गस्य[4] श्रोत्रं श्रोत्रस्य कथ्यते ॥ २६ ॥

हृदयं हृदयस्यैव महालिङ्गमुखं भवेत् ।

एवं लिङ्गमुखं प्रोक्तं सुप्रसिद्धमनन्तरम् ।
भक्तादिषट्-स्थलानां च हस्तभेदः प्रदर्श्यते ॥ २७ ॥

वस्तु[5]ना[5] भाव उत्पन्नः भा[6]वा[6]त् ज्ञानमसमुद्भवः ।
ज्ञाना[7]न्म[7]नस्समुत्पन्नं मनसोऽहङ्कृतिस्तथा ॥ २८ ॥

अहङ्कारात्ततो बुद्धिः बुद्धेश्चित्तस्य सम्भवः ।
एतेषां लक्षणं वक्ष्ये भावादीनामनुक्रमात् ॥ २९ ॥

---

[1] न्नैव (अ), न्नैतत् (क). [2] चक्षुरश्च तथा चक्षुः (अ, य, क्ष). [3] ङ्गं (क). [4] ङ्गं च (अ). [5] नो (क्ष). [6] व (अ). [7] त्म (अ).

---

* एतच्चिह्नान्तर्गतः ८ श्लोकार्धभागः 'अ' पुस्तके तिरोहितः ।

† एतच्चिह्नान्तर्गत २२ श्लोकोत्तरार्धभागः 'क, य, क्ष' संज्ञितासु प्रतिषु न दृश्यते ।

अस्तीत्यारभ्यते वस्तु तत्सत्ता भाव उच्यते ।
ज्ञानं जानाति तन्नित्यं मनस्तन्मनुते तदा ॥ ३० ॥

अहं तदित्यहङ्कारो बुद्धिस्तन्निश्चिनोति हि ।
चित्तं स्थैर्यगुणेनैव [1]तदे[1]तद्वस्तुसाध[2]क[2]म् ॥ ३१ ॥

चित्तं भक्तस्य हस्तस्स्यात् बुद्धिर्माहेश्वरस्य च ।
प्रसादिनस्तथा ह[3]स्तो[3] ह्यहङ्कार उदीर्यते ॥ ३२ ॥

*मनो हस्तो भवत्येव महतः प्राणलिङ्गिनः ।
ज्ञा[4]न[4] हस्तो भवत्येव शरणस्य महात्मनः ॥ ३३ ॥
ऐक्यस्य [5]भावो हस्त[5]स्स्यात् एवमेवोत्तरोत्तरम् ।*

आत्माङ्गं भावहस्तं [6]स्यात्[6] महालिङ्गार्चने रतम् ।
ऐक्यलिङ्गमिति प्राहुः साक्षाद्वेदान्तपारगाः ॥ ३४ ॥

व्योमाङ्गं ज्ञानहस्तं [7]स्यात्[7] प्रसादार्चनतत्परम् ।
शरणस्थलमित्याहुः शि[8]व[8]योगपरायणाः ॥ ३५ ॥

अनिलाङ्गं मनोहस्तं चरलिङ्गार्चने रतम् ।
प्राणलि[9]ङ्गि[9]स्थलं साक्षात् इत्याहुः शिवधर्मिकाः ॥ ३६ ॥

---

[1] दत्ते (अ). [2] र (अ, क). [3] स्ता (अ). [4] न (अ). [5] हस्तो भाव, (अ, क). [6] च (क). [7] च (अ, क). [8] वं (अ), [9] ङ्गा च (अ).

---

† एतच्चिह्नान्तर्गतसार्धश्लोकैकभागः मुद्रितपुस्तकवत् ३३ संख्यातत्वे नात्र

अनलाङ्गम[1]हा[1]हस्तं शिवलिङ्गार्चने रतम् ।
प्रसादिस्थलमित्याहुः आचार्याः शिवशास्त्रिणः ।। ३७ ।।

जलाङ्गं बुद्धिहस्तं च गुरुलिङ्गार्चने रतम् ।
[2]मा[2]हेश्वरस्थलं साक्षात् [3]इति[3] प्राहुर्मनीषिणः ।। ३८ ।।

भूम्यङ्गं चित्तहस्तं च सदाचारार्चने रतम् ।
भक्तस्थलमिति प्राहुः शिवसिद्धान्तवेदिनः ।। ३९ ।।

एवमङ्गं च हस्तं च लिङ्गं च मुखमत्र च ।
यथाव[4]दा[4]नुपूर्वेण प्रावोचमहमादरात् ।। ४० ।।

*ततः पञ्चाक्षरी विद्या साहित्यमधुनोच्यते ।
पञ्चाक्षरी परा विद्या सतारा तु षडक्ष[5]री[5] ।।
स्थलसूक्ष्मादिभेदेन स्वयमेवाष्टधा स्थिता ।
‡शिवमन्त्राभिधा मन्त्रमातृका लिङ्गरूपिणी ।। ४१ ।।
शिवप्रदायिनी नित्यं सर्वाङ्गेषु प्रतिष्ठिता ।‡*

---

1 हं (य, क्ष). 2 म (क). 3 एवं (क). 4 द् (अ, क). 5 रे (क).

---

* एतच्चिह्नान्तर्गतसार्धश्लोकद्वयभागः एकत्वेन संख्यया यथा मुद्रितप्रतौ गणितः तथाऽत्रापि परिगणितः ।

‡ एतच्चिह्नान्तर्गतः "शिवमन्त्राभिधा" इत्ययं श्लोकः 'अ' ग्रन्थे नष्टः ग्रन्थपातात् । स च 'य' पुस्तके इत्थं दृश्यते—

"शिवमन्त्राभिधा सूक्ष्मा सर्वांगेषु प्रतिष्ठिता ।" 'क' प्रतौ तु अयं श्लोक एव नास्ति ।

*अङ्गं नमः पदमसौ शिव एव लिङ्गं
सम्बन्ध †एषां यदयेति पदं तदुक्तम् ।
लिङ्गाङ्गसङ्गमपदत्रयबोधनार्थं
मन्त्रोऽयमेवमभिधास्यति मन्त्रराजः ।। ४२ ।।

नमः पदं तत् खलु जीववाचि
शिवः पदं तत्परमात्मवाचि ।
अयेति तादात्म्यपदं तदेतत्
नमश्शिवायेति जगाद मन्त्रः* ।। ४३ ।।

‡मूलाधारे नकाराख्या संस्थिता परमेश्वरी ।
§स्वाधिष्ठा[1]ने मकाराख्या सर्वदा सुप्रतिष्ठिता[1] ।।

---

[1] नमकाराख्या सर्वदा सुप्रतिष्ठिता (अ), नमकाराख्या शाम्भवे पर्यवस्थिता (क), ने मकारस्स्यात् शिकारो मणिपूरके (क्ष).

---

† एतच्चिह्नान्तर्गतो भागः ‘ क ’ पुस्तके त्रुटिततालेे नष्टः ।

* एतच्चिह्नान्तर्गतः “ अंगं ” इत्यारभ्य “ मन्त्रः ” इत्यन्तः श्लोकद्वयभागः ‘ अ ’ पुस्तके नास्ति । ‘ क ’ पुस्तके तु “ नमः पदं ” इत्यारभ्य “ मन्त्रः ” इत्यन्तो भागः न दृश्यते ।

‡ एतच्चिह्नान्तर्गतः ‘ मूलाधारे ’ इत्यारभ्य ‘ समाहिता ’ इत्यन्तः भागः एकार्थप्रतिपादकत्वात् सार्धश्लोकद्वयत्वेन यथा मुद्रितप्रतौ तथा एकयैव श्लोकसंख्यात्र परिगणितः ।

§ एतच्चिह्नांतर्गतः—“ स्वाधिष्ठाने ”—इति श्लोकः ‘ य ’ पुस्तके नास्ति । ‘ क्ष ’ पुस्तके अस्यैव पद्यस्य उत्तरार्धो न दृश्यते । समग्रस्यास्य श्लोकस्य सत्वे एव—‘ नमः शिवायेति ’ मंत्रार्थः अक्षरानुपूर्वीक्रमेण सङ्गतो भवेत् । अतः अयं श्लोकः ताळादुद्धृत्यात्र सन्निविष्टः । मुद्रितग्रन्थसम्पादकानां समग्रस्यास्य श्लोकस्यालाभ एव तेषां तत्त्यागकारणं भवेदित्यनुमिनुमः । ‘ क्ष ’ (मुद्रित) प्रतौ तु मंत्रार्थानुसारेण श्लोकार्धो निक्षिप्तः । तत्र आधारस्तावत् न तैः प्रत्येकं विवृतः ।

मणि[1]पूरे[1] महास्थाने शिकाराख्या महेश्वरी§ ।
अनाहते वाकाराख्या सदा[2] शैवी व्यवस्थिता[2] ।। ४४ ।।
विशुद्धौ [3]विमलस्थाने यकाराख्या समाहिता[3] । ‡

¶आज्ञा[4]चक्रे[4] महादेवी ताराख्या स[5]मुप[5]स्थिता ।
आचारा[6]ख्यं[6] नकार[7]स्स्यात् म[7]कारो गुरुलिङ्गकम् ।।
शिकारः शिवलिङ्गं स्यात् वाकारश्चरलिङ्गकम् ।
यकारस्स्यात् प्रसादाख्यं ओङ्कारो महदुच्यते¶ ।। ४५ ।।

*षष्ठं ब्रह्म भवेत्तारं यकारः पञ्चमं भवेत् ।
चतुर्थं तु वका[8]रस्स्यात्[8] शिकारस्तु तृतीयकम् ।।
[9]द्विती[9]यं तु मकारस्स्यात् नकारः प्रथमं भवेत् ।
एवं षडक्षराण्येव ब्रह्मणि क्रमशो विदुः* ।। ४६ ।।

†ओङ्कारः परिपूर्णत्वात् त्वचि सर्वत्र तिष्ठति ।
नका[10]रो[10] रुधि[11]रे स्था[11]ति मकारो मांससञ्च[12]ये[12] ।।

---

[1] रक -(क). [2] वसति शोभना (अ), व्यवसिता (क). [3] तु यकाराख्य साक्षाद्विश्वेश्वरी स्थिता (क, य, क्ष). [4] स्थाने (अ). [5] मव (अ, क). [6] ख्यव (अ), ख्य (क). [7] श्चरस्स्यान्म (क). [8] राख्यः (क). [9] द्वी (य). [10] रे (क), [11] ति सा (क). [12] यः (अ, य)

¶ एतच्चिह्नान्तर्गतः—'आज्ञाचक्रे' इत्यारभ्य 'महदुच्यते' इत्यन्तो भागः एकार्थप्रतिपादकतया मुद्रितकोशवत् एकसंख्यात्वेन परिगणितः ।

* एतच्चिह्नान्तर्गतः 'षष्ठं' इत्यारभ्य 'विदुः' इत्यन्तो भागः एकार्थप्रतिपादकत्वेन मुद्रितग्रन्थवत् एकसंख्यया परिगणितः ।

† 'ओङ्कारे' त्यारभ्य 'षडात्मक' इत्यन्तो (४७श्लोकः) भागः मुद्रितकोषवत् एक-श्लोकसङ्ख्यात्वेन ग्रथितः ।

शिकारो मेदसि स्था[1]ति वा[1]कारोस्थिषु तिष्ठति ।
यकारः स्थाति मज्जायां शुक्ले स्थाति षडात्मकः* ।। ४७ ।।

एवं षडक्षरमयं शिव[2]वन्मूर्ति[2]संस्थितम् ।
देहं ममेति यो ध्यायेत् सोऽहमेव न संशयः ।। ४८ ।।

सर्वाङ्गलिङ्गसाहित्यमेवमेव मयोदितम् ।
शिवप्रणीतवाक्या[3]र्थं[3] सम्यग्वीक्ष्य समासतः ।। ४९ ।।

एतद्यो वेद सोऽविद्याग्रन्थिं विकिरति प्रभुः ।
शिवसिद्धान्तकं तन्त्रं शिवाद्वै[4]तं[4] शिवं पदम् ।। ५० ।।

[5]इत्य[5]नुभवसूत्रे ‡शिवसिद्धान्ततन्त्रे‡ §षट्स्थलनिर्णये§
लिङ्गाङ्गसंयोगविधिर्नाम
ष[6]ष्ठा[6]धिकरणं ¶सम्पूर्णम्¶

---

[1] ति व (अ), तुमौ (क). [2] मर्मान्त (अ, क). [3] र्थं (अ, क, य). [4] त (क). [5] इति श्री वातुलोत्तरतन्त्रे शिवा (य), शिवा (क्ष). [6] षष्ठम (क्ष).

---

‡ एतच्चिह्नान्तर्गतो भागः 'य, क्ष' योः नास्ति ।
§ एतच्चिह्नान्तर्गतो भागः 'क्ष' पुस्तके नास्ति ।
¶ एतच्चिह्नान्तर्गतो भागः 'अ, य' पुस्तकयोरेव पाठः ।

अर्पणसद्भावः

सप्तमाधिकरणम्

अ[1]थ[1] क्रियासु सर्वासु निर्लेपत्वाय चात्मनः ।
श्रीलिङ्गार्पणसद्भावमीश्वरो[2]क्तमहं[2] ब्रुवे ॥ १ ॥

[3]द्वेधा लिङ्गार्पण विधिः[3] प्रोच्यते देशिकोत्तमैः ।
क्रिया[4]र्पणमतं[4] किञ्चित् [5]किञ्चित् ज्ञान[5]मतार्पणम् ॥ २ ॥

*यथा कालोचितैर्द्रव्यैः यदृच्छासम्भवैः स्वयम् ।
स्वोपभोगाय यत्कार्यं त्रिषु लिङ्गेषु सादरम् ॥ ३ ॥
तत्क्रियार्पणमित्याहुः अर्पणैकविशारदाः ।*

षट्सु लिङ्गेषु सर्वत्र सार्वका[6]लि[6]करूपतः ।
स्वयमागतवस्तूनि ज्ञात्वा तत्तन्मुखेषु च ॥ ४ ॥

‡ अनिच्छाविधिना कार्यं [7]एतज्ज्ञा[7]नार्पणं विदुः । ‡

---

[1] दा (अ), तः (क). [2] क्तं मनाक् (क, य, क्ष). [3] लिङ्गार्पण वेधिर्द्विध (अ). [4] मतार्पणं (अ, य, क्ष). [5] ज्ञान (क). [6] ल (य). [7] यत्तत् ज्ञा (क्ष), एतत्ज्ञा (क).

---

* एतच्चिह्नांतर्गतः ‘ यथा ’ इत्यारभ्य ‘ विशारदाः ’ इत्यंतो भागः यथा-मुद्रितप्रति ‘३’ अङ्कत्वेनात्र उट्टङ्कितः ; एकवाक्यत्वात् ।

‡ एतच्चिह्नांतर्गतोऽर्धश्लोकः श्लोकसङ्ख्यायां अगणितः मुद्रिते यथा, तथा-

*क्रियार्पणं [1]वदाम्यत्र[1] सम्मतं द्रव्यशुद्धये ॥
या या क्रिया वि[2]धा[2]तव्या प्रस्तुता जायते पुरा ।
तां तां कुर्यान्महादे[3]वे[3] समर्पणधिया सुधीः ॥
‡शिवार्पितानि द्रव्याणि न बन्धाय न मुक्तये ।
साक्षाच्छिवप्रसादायैवेति शैवी परा स्थितिः‡ ॥
शिवार्पणविधानोऽत्र सूक्ष्मासूक्ष्मविभेदतः ।
विधीयते सदैवास्य स्वोपभोगाय चात्मनः ॥ ५ ॥*

आत्मोपभो[4]ग[4]जातानि द्रव्याणि [5]विवि[5]धानि च ।
स्थूलाख्यं प्रविविक्ताख्यं आनन्दाख्यमिति त्रिधा ॥ ६ ॥

स्थू[6]ल[6]द्रव्यं भवेद्रूपं प्रविविक्त रुचिर्भवेत् ।
आनन्दस्तु भवेत्तृप्तिः एवमेव पृथक् क्रमात् ॥ ७ ॥

बहिरङ्गार्पणे रूपमन्तरङ्गार्पणे रुचिः ।
§स्थूलद्रव्यार्पणं बाह्यं प्रविविक्तं तथान्तरम् ॥
आत्मसङ्गमयं साक्षात् आनन्दार्पणमुच्यते ।§
¶आत्माङ्गार्पणमेवात्र तृप्तिरित्यभिधीयते ॥¶

---

1 प्रवक्ष्यामि (य). 2 दा (अ). 3 व (क, य, क्ष). 4 ग्य (अ). 5 त्रि (अ, क, य). 6 लं (अ).

---

* एतच्चिह्नान्तर्गतः 'क्रियार्पणं' इत्यारभ्य 'चात्मनः' इत्यंतः श्लोकत्रयभागः एकसङ्ख्यात्वेन यथामुद्रितप्रति अत्र विनिवेशितः ।

‡ एतच्चिह्नान्तर्गतो भागः 'अ, क' पुस्तकयोर्न दृश्यते ।

§ 'स्थूल' इत्येतत्पद्यं समग्रं 'क' पुस्तके नास्ति ; परन्तु अस्यैव पद्यस्य पूर्वार्धमात्रं 'य, क्ष' योर्न दृश्यते ।

¶ एतच्चिह्नान्तर्गतो भागः 'अ' पुस्तके नास्ति ।

[1]स्थूल[1]द्रव्यार्पको विश्व इष्टलिंगे स्वभावतः ।
[2]अविविक्त[2]र्पकस्साक्षात् प्राणलिंगे तु तैजसः ॥

*भावलिंगे सदा [3]प्रज्ञातृप्तिद्रव्यसमर्पकः[3] ।
†यद्रूपमर्पितं लिंगे तद्रूपं भोक्तुमर्हति ॥ ८ ॥
रूपान्तरं न भोक्तव्यं भुंक्त चेत्तदनर्पितम् ।†

इष्टलिङ्गार्पितं शुद्धं प्राणलिङ्गमुखार्पितम् ।
सिद्धं ततः प्रसिद्धं हि भावलिङ्गार्पितं विदुः ॥ ९ ॥

---

[1] रूप (क, य, क्ष). [2] रुचिद्रव्या (क, य, क्ष). [3] प्राज्ञः आनन्दार्पक उच्यते (अ, य, क्ष).

---

* एतच्चिह्नांतर्गतः सार्धैकश्लोकभागः यथा मुद्रणप्रति ८ सङ्ख्यात्वेनात्र निविष्टः ।

† 'यद्रूप' इति पद्यस्यास्योपष्टम्भकतदर्थोपबृंहणात्मकः अधः प्रदर्शितो भागविशेषः 'य, क्ष' पुस्तकयोर्दृश्यते यथा—

यथा भुक्तिक्रिया [1]पुं[1]सि क्रमेणानुप्रवर्तते ।
सुप्रतिष्ठितलिङ्गस्य न यथा पूर्वभावना ॥
तथा शिवप्रसादस्य पूर्वनाम न संस्मरेत् ।
पूजादौ पूजान्ते भवेदग्रे प्रपदेत्पुनरेष हि प्रसादतनुम् ॥
पदार्थकायः पूजायां भक्तो भक्तिप्रभावतः ।
प्रसादकायः पूजान्ते पुनः पूजाक्रियावधि ॥
यद्रूपं वस्तु नामार्चाकाले लिङ्गमुखार्पितम् ।
तद्रूपं पुनरर्चाकालपर्यन्तं प्रसादकम् ॥
लिङ्गस्य पूजावसरे द्रव्यं दत्तं शुभं भवेत् ।
अनावसरिकं दत्तं अशुभं तदनर्पितम् ॥
लिङ्गस्यावसरे यत्तद्द्रव्यं दत्तं शुभं भवेत् ।
आत्मनोवसरे दत्तमशुभं तदनर्पितम् ॥

---

[1] पूं (य).

[1]त[1]त्तदर्पणतो लब्धं प्रसादं तत्तदादरात् ।
भुङ्क्ते [2]यत्नात्स्व[2]यं विश्वतैज[3]स[3]प्राज्ञरूपतः ।। १० ।।

जाग्रत्स्वप्नसुषुप्त्या[4]दि[4]सर्वावस्थासु सर्वदा ।
लिङ्गार्पितोपभोगेन नि[5]र्लेपोऽ[5]यं न संशयः ।। ११ ।।

त्रिषु धामसु यद्भोग्यं भोक्ता [6]भोग्यं च यो भवेत्[6] ।
[7]त्रिविधं[7] प्रति यो [8]वेद स[8] भुञ्जानो न लिप्यते* ।। १२ ।।

ज्ञानार्पण[9]मतो[9] वक्ष्ये स्वानुभूत्यैकगोचरम् ।
सर्वेन्द्रियमुखागामिद्रव्यदोषनिवृत्तये ।। १३ ।।

सोऽयं षट्स्थलरूपेण तत्तल्लिङ्गमुखार्पितम् ।
प्रसादमादरेणैव स्वतस्सिद्धं स[10]मश्नु[10]ते ।। १४ ।।

षडक्षरात्मके लि[11]ङ्गे[11] सर्वाङ्गे सुप्रतिष्ठिते ।
[12]अत्रैतद[12]र्पितं सर्वमित्याहुः श्रुतयः [13]किल[13] ।। १५ ।।

†ओमिति जगदखिलं स्यात्
नम इति न ममेदमपि शिवायेति ।
समर्पकोऽयं मन्त्रः
षडक्षरो मन्त्रनायको जयति ।। १६ ।।

---

1 (य) (अ). 2 ह्यात्मस्व (अ, क). 3 सः (क). 4 दे: (क). 5 र्लेपो (अ), र्लिप्तो (क्ष). 6 यश्च प्रकीर्तित: (अ), भोगश्च यो भवेत् (य, क्ष). 7 अभयं (अ). 8 भेदस्स (क). 9 तं (क). 10 प्णु (क्ष). 11 ङ्ग (क). 12 तत्रैव चा (अ). 13 खलु (क, य, क्ष).

---

* अत्र "क्रियार्पणम्" इति 'अ, क' पुस्तकयोर्दृश्यते ।

† 'ओमिति' पद्यमारभ्य 'न ममेदं' इत्येतत्पद्यस्यान्तं यावत् 'अ' पुस्तके नास्ति ।

न ममेदं जगत्सर्वं शिवायेति शिवार्पणम् ।
अभिव्यक्ते द्विमन्त्राह्वो मन्त्रो लुप्त अकारकः ।। १७ ।।

तस्मादर्पणसद्भावज्ञानमेव [1]सदा[1]भ्यसेत् ।

‡अथ गन्धो रसो रूपं स्प[2]र्शः[2] शब्दस्ततःप[3]रम्[3] ।
परिणा[4]म[4]पदार्था हि षडेते [5]सार्व[5]का[6]लिकाः[6] ।।
§एकैकस्य पदार्थस्य नानाभेदाः पृथक् पृथक् ।
गन्धादय इमे मात्ताः पृथ्व्यादीनामनुक्रमात् ।। १८ ।।
एकस्मिन् वस्तुनि [7]र[7]ताः ते सर्वे ह्येकरूपतः ।‡

¶चन्दनादि[8]म[8]यो गन्धः मधुरादिमयो रसः ।
वैद्युतादिमयं रूपं स्पर्शो मृद्वादितन्मयः ।।
स्यान्नादादिमयश्शब्दः परिणामस्ततः[9]परम्[9] ।
सुखादिमय इत्येवं नानाभेदाः प्रकीर्तिताः ।।¶ १९ ।।

एवं रूपेषु सर्वेषु पदार्थेषु निरन्तरम् ।
लिङ्गार्पण[10]धिया[10] ह्यात्मा प्रसादसुखमश्नुते ।। २० ।।

---

1 सम (अ, य, क्ष). 2 र्श (अ). 3 रः (क). 4 मः (अ). 5 स्वार्थ (अ, क). 6 रकः (क). 7 ग (अ). 8 सु (अ). 9 रः (क, य, क्ष). 10 धिया (अ).

---

* एतच्चिह्नांतर्गतः अर्धश्लोकः यथामुद्रितप्रति विशिष्टः पद्याङ्कानुटङ्कितः स्थापितः ।

‡ अथेत्यादि सार्धश्लोकद्वयभागः यथा मुद्रितप्रति १८ पद्यसंख्यात्वेन विनिविष्टः ।

§ 'एकैकस्य' 'गन्धादय' इत्येतश्लोकार्धद्वयं 'अ, क' पुस्तकयोः विपरिणतमस्ति ।

¶ एतच्चिह्नान्तर्गतश्लोकद्वयभागः यथामुद्रितप्रति १९ श्लोकत्वेनपरिगणितः ।

द्रव्याण्येतानि [1]सर्वाणि[1] विभज्य स्वस्वरूपतः ।
लिङ्गार्पणधिया भुङ्क्ते तानि वस्तूनि सर्वदा ॥ २१ ॥

भक्तोऽयमात्मा स्वयमेव गन्धं
आचारलिङ्गा[2]र्पि[2]तमादरेण ।
भुङ्क्ते सदा सन्निहितस्वभावात्
प्रसादरूपेण समागतं हि ॥ २२ ॥

महेश्वरोऽयं गुरुलिङ्गमूर्तेः
मुखे सदैवार्पितमाकलय्य ।
प्रसादभूतं रसमा‡नुकूल्यं‡
स्वभावतः सादरमेव भुङ्क्ते ॥

रूपं पदार्थं शिवलिङ्गवक्त्रे
समर्पितं सन्ततमेव भक्त्या ।
स्वयं समायातमुपाधि[3]योगा[3]त्
अयं प्रसादी भजते प्रसा[4]द[4]म् ॥ २३ ॥

स्प[5]र्शं[5] समादाय बहुप्रका[6]रं[6]
समर्पितं यच्चरलिङ्गवक्त्रे ।
भुङ्क्ते प्रसादात्मतयोपलब्धं
यः प्राणलिङ्गी स्वयमेवमात्मना ॥ २४ ॥

---

[1] सिद्धानि (क). [2] र्दि (क). [3] भेदा (अ). [4] ध (अ). [5] शं (क), र्शः (थ). [6] रात् (अ).

---

‡ मतुल्यं इति ' क ' पुस्तकपाठः ।

य एष नित्यं शरणस्थलात्मा
प्रसादलिङ्गार्पितमेव शब्दम् ।
स्वयं गृहीत्वा विविधोपादिष्टं
प्रसादभोगं कुरुते [1]स्व[1]भावात् ।। २५ ।।

ऐक्यात्मकोऽयं परिणामवस्तु
सदा महालिङ्गसमर्पितं हि ।
स्वभावसिद्धं निजभक्तियोगात्
निषेवते तृप्तिघनप्रसादम् ।। २६ ।।

एवं षडङ्गस्थलरूपतोऽसौ
[2]स्वस्मिन्[2]स्थिते षड्विधलिङ्गतत्त्वे ।
समर्पितं षड्विधवस्तु जातं
प्रसादरूपेण सदैव भुङ्क्ते ।। २७ ।।

*आचारायार्पिता पृथ्वी गुरोरापस्समर्पिताः ।
शिवाय चार्पितं तेजः चराय मरुदर्पितः ।। २८ ।।
प्रसादायार्पितं व्योम जीवात्मा महतेर्पितः ।*

आचारे दिव्यलिङ्गे निरुपमनिजभक्तस्य ऊ[3]क्य[3]भाजि
प्रा[4]णाख्ये[4] चित्तहस्तेन च घनसुखहे[5]तौ[5] क्रियाशक्तियुक्ते ।

---

[1] प्र (अ). [2] स्वात्म (अ). [3] क (अ). [4] ण स्ये (अ, क). [5] तु (अ).

---

* एतच्चिह्नांतर्गतो भागः (अ, क) योः कोशयोर्न दृश्यते । अयं च अयं साधश्लोकैकभागः मुद्रितपुस्तकवत् २८ संख्यात्वेनात्र संयोजितः ।

घ्रातव्यं द्रव्यमप्यर्पणविषयविधानोपदिष्टं समर्प्य
प्रायस्सद्भक्तिपू[1]र्ण[1]स्स्व[2]यमयमिह[2] गन्धप्रसादं भजेत ॥ २९ ॥

स्वाङ्गे माहेश्वरात्मन्यनुपमसहजज्ञानशक्तिप्रयुक्ते
[3]जिज्ञास्ये[3] सुप्रसि[4]द्धे[4] परतरगुरुलिङ्गाभि[5]धे[5]संस्थितेऽस्मिन् ।
निष्ठाभक्तिप्रभावप्रणिहितसुमहाबुद्धिहस्तेन विद्वान्
रस्यं द्रव्यं समर्प्य स्वयममलरसाख्यं प्रसादं भजेत ॥ ३० ॥

योऽसौ नि[6]त्यं[6] प्रसादिस्थलपरमपदप्राप्तदिव्याङ्गभाजि
स्वेच्छाशक्तिप्रयुक्ते दृशि जगति मुखे पाणिनाहङ्कृतेन ।
साक्षाल्लिङ्गे शिवाख्ये सविनयमवधानात्मता[7]भ[7]क्तियु[8]क्तो[8]
द्रष्टव्यांशं समर्प्यार्पणविनिहितरूपप्रसादं भजेत ॥ ३१ ॥

सं[9]सक्त[9] प्राणलिङ्गिस्थलनिहितनिजाङ्गे मनः[10]प्र[10]णिनासौ
लिङ्गे [11]साक्षा[11]च्चराख्ये त्वचि ज[12]गति वि[12]मुखे ह्यादिशक्तिप्रयुक्ते ।
[13]स्प्र[13]ष्टव्यं चार्पयित्वा स्वयमनुभवभक्तिप्रभावोपपन्नो
नित्यं स्पर्शप्रसादं निरतिशयसुखं तत्त्ववेत्ता भजेत ॥ ३२ ॥

लिङ्गे साक्षात्प्रसा[14]दे[14] विमलशरण[15]संज्ञा[15]ङ्ग संस्थापि[16]ते[16]ऽस्मिन्
श्रोतव्यं श्रोत्रवक्त्रे निखिलमिह पराशक्तियुक्ते समर्प्य ।
आनन्दाकारभक्तिस्फुटतरपरमज्ञानहस्तेन सोऽयं
शब्दाख्यं तत्प्रसादं स्वयमविरतमत्याश्र[17]म[17]स्थो भजेत ॥ ३३ ॥

---

[1] र्णा(अ, क). [2] यमि (अ). [3] जिह्वास्य (अ), लिङ्गास्ये (य, क्ष). [4] द्ध (अ). [5] दे (अ), धैः (क). [6] त्य (अ). [7] श (अ). [8] क्तौ (क). [9] शक्त (अ), शक्ति (क). [10] प्रा (क). [11] चास्मिन् स (अ). [12] ग (अ). [13] स्व (क). [14] द (क) [15] स्थे (अ). [16] चा (अ). [17] य (अ).

ऐक्या [1]ङ्ग[1] भा [2]जि[2] लिङ्गे महति हृदि मुखे चिन्महाशक्तियुक्ते
नित्यं भावेन हस्तेन च समरसभक्तिप्र[3]स[3]क्तः स्वयं सन् ।
[4]समर्त[4]व्यं चार्पयित्वा वि[5]शद[5]मतिरवश्यं स[6]दैवा[6]र्पणीयं
तस्माल्लब्धं विशुद्धं घनतरपरिणामप्रसादं भजेत ।। ३४ ।।

*अङ्गं च लिङ्गं च मुखं च हस्तौ
भक्तिश्च शक्तिश्च तथार्पणं च ।
प्रसाद इत्यष्टविधस्थलानि
प्रतिस्थलं षट्स्थलसंज्ञितानि ।। ३५ ।।

सवितुः पदमङ्गं स्यात् भर्गपदं लिङ्गमेव सम्बन्धः‡ ।
धीमहि पदमित्येषा गायत्र्याङ्गलिङ्गसम्बन्धः§ ।। ३६ ।।

जीवस्सविता देवः परमो भर्गस्तदर्थकं वरणीयम् ।
अनयोरैक्यं धीमहि पदमेषा प्राह जीवपरैक्यम् ।। ३७ ।।

†अङ्गं च लिङ्गं च [7]सदेव जातं[7]
भक्तिश्च शक्तिश्च तथा [8]चिदेव[8] ।

---

[1] ङ्गं (क, य, क्ष). [2] व (क). [3] श (अ). [4] ज्ञातव्यं (क, क्ष). [5] मल (अ). [6] सपर्या (अ). [7] सदैव जातं (अ). मुखं च हस्तौ (क). [8]र्पणं च (क).

---

* अत्र — ' उपजातिवृत्तम् ' इत्येतच्चिह्नाधस्तनयोः पद्ययोर्वृत्तनिर्देशः ' अ ' पुस्तके दृश्यते ।

---

‡ न्धम् (क्ष). § न्धम् (य).

[1]आनन्द एव स्वयमर्पणं च[1]
[2]प्रसादरूपं च भवेत् त्रितत्त्वम्[2] ॥ ३८ ॥

*अङ्गं जीवः परमो लिङ्गं
सम्बन्ध एव तादात्म्यम् ।
तद्वत्पदार्थरूपं प्रसाद-
रूपं समर्पणं त्रिविधम् ॥ ३९ ॥

[3]पदार्थ[3]रूपो जीवश्च प्रसादः परमो भवेत् ।
समर्पणं च तादात्म्यं इति शैवी परा स्थितिः ॥४०॥*

†एकधा च त्रिधा च षड्धा (?) नवधा च प्रवर्तते ।
स्वयमेव परं लिङ्गं न ततोन्यच्च किञ्चन ॥ ४१ ॥†

नवलिङ्गान्यविज्ञायतन्मुखान्यर्पणानि च ।
कथं निर्लेपतामेति सर्वेष्विन्द्रियकर्मसु । ४२ ॥

‡लेपोऽङ्गं न जहेज्जातु तज्ज्ञं स्पृशति न क्वचित् ।
सर्पिषा लिप्यते पाणी रसना नैव लिप्यते ॥ ४३ ॥

यथा कालिकया दृष्टौ सम्पृक्तापि न लिप्यते ।
पक्ष्मणोरन्तरा तारा तथा सम्यक् शिवात्मवित् ॥ ४४ ॥‡

---

[1] आनन्द एवार्पणमुत्तमं च (अ), प्रसाद इत्येव च षट्स्थलानि (क).
[2] प्रतिस्थले षट्स्थलसंज्ञितानि (क). [3] प्रसाद (य).

---

* एतच्चिह्नान्तर्गते पद्ये ' य, क्ष ' पुस्तकयोरेव दृश्येते ।
† एतच्चिह्नान्तर्गतः श्लोकः ' अ, क, य ' पुस्तकेषु नास्ति ।
‡ एतच्चिह्नान्तर्गतौ श्लोकौ ' अ, क ' पुस्तकयोर्न दृश्येते ।

शरीरादिपदार्थांश्च दत्वा दानं समर्पणम् ।
समर्प्य सोऽहमस्मीति दासोऽहंभाव उच्यते ॥ ४५ ॥

इन्द्रियादागतं किञ्चित् यत्सुखं तच्छिवार्पितम् ।
तत्प्रसादं तु भोक्तव्यं तदिन्द्रियमुखेन च ॥ ४६ ॥

‡येन गन्धरसौ रूपस्पर्शशब्दरतिक्रियाः ।
एतेनैव विजानाति किमत्र परिशिष्यते ॥ ४७ ॥‡

एवं लिङ्गार्पितं सर्वं इति यो वेत्ति तत्त्वतः ।
सोऽश्नुते सकलान् [1]भोगा[1]न् विपश्चित् ब्रह्मणा सह ॥ ४८ ॥

*लिङ्गदेही सदात्मायं लिङ्गाचारो न लौकिकः ।
सर्वं लिङ्गमयं रूपं लिङ्गेन सममश्नुते ॥ ४९ ॥

सर्वाङ्गं लिङ्गमेव स्यात् अन्नपानाद्यमर्पितम् ।
प्रसादस्तृप्तिरेव स्यात् सर्वं लिङ्गमयत्वतः ॥ ५० ॥‡

एतदर्पणसद्भावज्ञानं वेदान्तवाक्यजम् ।
गुरूपदेशतस्साध्यं नान्यथा शास्त्रकोटिभिः ॥५१ ॥

---

[1] कामा (अ, क).

---

‡ एतच्चिह्नांतर्गतपद्यपूर्वोत्तरार्धयोर्मध्येऽयमर्धःप्रदर्शितः श्लोकार्धो दृश्यते—
" गन्धाद्रसाद्रूपं स्पर्शाच्छब्दात् रतिक्रियाम् " इति।

* एतच्चिह्नान्तर्गतो भागः ' य, क्ष ' पुस्तकयोर्नास्ति ।

[1]श्रीलिङ्गा[1]र्पणसद्भावम[2]वो[2]चं परमार्थतः ।
अर्पितं च प्रसादं च [3]भो[3]गं निर्लेपतां प्रति ।। ५२ ।।

एतद्यो वेद वेद सोऽविद्याग्रन्थिं विकिरति प्रभुः ।
शिवसिद्धान्तकं तन्त्रं शिवाद्वैतं शिवं पदम् ।। ५३ ।।

[4]इत्य[4]नुभवसूत्रे †शिवसिद्धान्ततन्त्रे† §षट्स्थलनिर्णये§
अर्पणसद्भावो नाम
सप्तमाधिकरणं ¶सम्पूर्णम्¶

---

[1] एतद् (अ). [2] थो (क). [3] यो (अ). [2] इति वातुलोत्तरतन्त्रे शिवा (य), शिवा (क्ष).

---

† एतच्चिह्नान्तर्गतो भागः ' क्ष ' पुस्तके नास्ति ।
§ एतच्चिह्नान्तर्गतो भागः ' अ, क ' पुस्तकयोर्नास्ति ।
¶ एतच्चिह्नान्तर्गतो भाग : ' य, क्ष ' पुस्तकयोर्नास्ति ।

क्रियाविश्रान्तिः

अष्टमाधिकरणम्

क्रियाविश्रान्तिमाचक्षे साक्षादीश्वर[1]भाषि[1]ताम् ।
देव्यै रहस्यरूपेण तामिदानीं [2]समास[2]तः ॥ १ ॥

अस्यात्मनः क्रिया[3]स्सर्वाः[3] लिङ्गार्पिततया स्थि[4]ताः[4] ।
स्वस्मिन्नेव स्वयं यान्ति विश्रान्तिं सुखलक्षणाम् ॥ २ ॥

प्रोच्यते परमार्थज्ञैः क्रियाविश्रान्तिरित्यतः ।
क्रियाविश्रान्तिरेवात्र सम्यग्ज्ञानं न संशयः ॥ ३ ॥

सम्यग्ज्ञानमयं सा[5]क्षात्[5]शिव एवेति वेदनम् ।
वेदनेनैव तेनायं आप्तकामः सुखी भवेत् ॥ ४ ॥

[6]आप्तकामस्य[6] सुखिनः कामाचारा बहिर्मुखाः ।
प्रवृत्ता लौकिकास्सर्वे प्रययुर्नाशमात्मनि ॥ ५ ॥

[7]प्र[7]णष्टेष्वेषु सर्वेषु स्वेच्छाचारेण यत्कृतम् ।
तच्छिवा[8]र्चन[8]मेव स्यात् यद्भुक्तं तच्छिवार्पितम् ॥ ६ ॥

---

[1] बोधि (क). [2] स्वरूप (अ). [3] शक्तिः सर्वे (क). [4] ता (क).
[5] धु (क). [6] ज्ञानात्त (क). [7] प्रा (अ). [8] र्पण (अ), र्चण (क).

शिवरूपतया सर्वं यस्य भाति स्व[1]रूप[1]तः ।
स्वेच्छाचारसमाचारः तस्य चार्चा हि शूलिनः ॥ ७ ॥

एवमर्चनमीश[2]स्य स्वे[2]च्छाचारनिबन्धना ।
भवत्येव न सन्देहः शिवोऽहमिति वेदनात् ॥ ८ ॥

* अहमिति शिव एव सत्यचिद्घनः
स्फुरति तदा पृथगस्ति नैव वस्तु ।
इदमिति वपुषा [3]न[3] तेन बन्धनं
न हि [4]शरण[4]स्य विमोचनं [5]हि[5] किञ्चित् ॥ ९ ॥

बन्धमुक्त्योरभावे हि भक्तिरु[6]क्ता[6] निरर्ग[7]ळा[7] ।
न बन्धे मोचने चापि न तयोश्च समुच्चये ॥ १० ॥

बन्धे सति विमुक्तिस्स्यात् सत्यां मुक्तौ च बन्धनम् ।
अन्यस्यापगमादन्य आगमिष्यति केनचित् ॥ ११ ॥

परस[8]रानु[8]बन्धेन व[9]र्त[9]ते बन्धमोचने ।
तस्मात्तयोरभावे तु भक्ति[10]रुक्ता[10] निरङ्कुशा ॥ १२ ॥

न यो[11]गो[11] न तपो नार्चाक्रमः कोऽपि न विद्यते ।
अमाये शिवमार्गेऽस्मिन् भक्तिरेका प्रशस्यते ॥ १३ ॥

---

[1] भाव (अ,क). [2] स्यासे (अ). [3] च (अ), [4] पुरुष (क). [5] च (य, क्ष). [6] क्त (अ). [7] ळः (अ). [8] रम (क). [9] र्ते (अ). [10] बद्धो (क). [11] गे (क).

---

* 'अहमिति' पद्यारम्भे पद्यस्यास्य "अर्धसमवृत्तम्" इति वृत्तनिर्देशः 'अ, क' ग्रन्थयोः दृश्यते ।

* ज्ञानं ब्रूते भक्तिः कुरुते
शिवजीवयोः पृथग्भावम् ।
तेन ज्ञानं पूर्वं भक्तिस्तू-
त्तरतया विभाति ततः ॥ १४ ॥

पापान्नरकः पुण्यात्स्वर्गः
ताभ्यां विनैव कर्मभ्याम् ।
ज्ञानान्मोक्षस्त्रिभिरेव
विना स्यात्प्रसादतो भक्तिः* ॥ १५ ॥

प्रसादादेव सा भक्तिः प्रसादो भक्तिसम्भवः ।
यथैवाङ्कुरतो बीजं बीजतो वा यथाङ्कुरः ॥ १६ ॥‡

भक्तिस्सत्वगुणस्था
रजोगुणाढ्या तमोगुण स्थिता ।
स्वात[1]न्त्र्ये[1]ण सलीला
प्रवर्तते शिवसमर्पिता शुद्धा ॥ १७ ॥

†सत्वरज[2]स्तमसामप्यतिरिक्ता[2]
भक्तिरेभिरुपपन्ना ।
[3]स्व[3]विशुद्धतया [4]तानप्येका[4]कारा[5]न्
करो[5]ति हि त्रिगुणान्† ॥ १८ ॥

---

[1] न्त्र (अ, क्ष). [2] सत्वरजस्तामसमप्येवेति का (क). [3] स (क).
[4] तस्मादे (अ, क). [5] न्मरौति (क).

---

* एतच्चिह्नान्तर्गतौ श्लोकौ '२७' सङ्ख्याङ्कित 'शुभं कर्माशुभं कर्म' इति पद्यानन्तरस्थश्लोकत्रयस्य आद्यन्तश्लोकौ 'य क्ष' ग्रन्थयोर्भवतः ।

‡ एतच्चिह्नाङ्कितं पद्यं 'अ, क' पुस्तकयोर्नास्ति ।

† एतच्चिह्नान्तर्गतः श्लोकः 'अ' पुस्तके नास्ति ।

न राज[1]सो[1] गु[2]णो[2] भक्तौ परा[3]यां[3] नैव तामसः ।
न सात्त्विकगुणोऽपि स्यात् स्वगुणैरगुणैव सा ॥ १९ ॥

*रौप्यं ताम्रमयोघनं त्रितयमेतत्सात्त्विकं राजसं
प्रोक्तं तामसमेषु च त्रिषु [4]विले[4]पं सश्रितेऽपि स्वयम् ।
[5]कुर्या[5]त्सिद्धरसः स्वनिर्मलतया लोहत्रयं [6]तद्यथा[6]
स्वर्णं षोडशवर्णपूर्णमकरोद्भक्ति[7]स्तथा[7] त्रीन् गुणान् ॥ २० ॥

यथा सिद्धरसो लोहत्रयं चैकप्र[8]कार[8]तः ।
[9]कुर्यात्स्व[9]र्णं तथा भक्तिर[10]तिः[10] शैवं गुणत्रयम् ॥ २१ ॥

कस्तूरीहिमकुङ्कुमानि [11]हि[11] तमस्सत्त्वं रजो वर्णतः
कृष्णं शु[12]भ्र[12]मथारुणं यदुपरि प्राप्ता शिवैकात्मिका ।
भक्तिः स्वात्मगुणा[13]त्मि[13]का जयति तत्सद्वासनारूपिणी
नैर्गुण्ये परमे पदे किमिह वक्ष्ये भक्तियोगस्थि[14]ति[14]म् ॥ २२ ॥

‡शिलालेखा स्थ[15]ली[15]लेखा जललेखा त्रिधा क्रमात् ।
शुभाशुभात्मिका कर्मज्ञानभक्तिक्रिया मता ॥

---

1 सा (य). 2 णा (अ). 3 र्थे (क). 4 निर्ले (क). 5 नेया (क). 6 चैकदा (अ, क). 7 स्सदा (अ). 8 ताप (अ). 9 चक्रे स (अ, क). 10 तिः (अ). 11 च (अ). 12 क्रु (अ). 13 घि (अ). 14 त (क). 15 ला (य).

---

* अत्र "रौप्यं" इति पद्यस्य शार्दूलविक्रीडितता 'अ: क' पुस्तकयोर्निर्दिष्टा ।

‡ एतच्चिह्नान्तर्गतपद्यद्वयं २५ सङ्ख्यासङ्केतित 'इन्द्रियाकार' इति पद्यानन्तरं य, क्ष पुस्तकयोर्वर्तते ।

अथ च 'शिलालेखा' इत्यारभ्य 'लुप्यते' इत्यन्तं मुद्रितप्रतौ यथा एकसंख्यात्वेन पद्यद्वयं परिगणितं तथात्रापि विशिष्टैकार्थप्रतिपादकतयास्य भागस्य २२ संख्यात्वेन निर्देशः कृतः ।

[1] नै[1]व लो[2]प्या[2] शिलालेखा [3]स्थली[3]लेखा च लुप्यते ।
नादौ लेखायते चान्ते जललेखा न लुप्यते+ ॥ २३ ॥

अहं कर्ता समस्तस्य धर्माधर्मस्य कर्मणः ।
इत्यनेनाभिमानेन कर्म[4]का[4]ण्डोऽयमुच्यते ॥

नाहं कर्तास्य कर्तृत्वं शिवस्साक्षी स्वभावतः ।
इत्यनेनाभिमानेन ज्ञानकाण्डोऽयमुच्यते ॥

न कर्ताहं न साक्षी च शिव[5]एवे[5]ति कर्म[6]णा[6] ।
द्वयाभिमानराहित्यं [7]भ[7]क्ति[8]का[8]ण्डोऽयमुच्यते ॥ २४ ॥

*शुक्तिः कर्मपदं सरोरुहदळं ज्ञानं पदं भाक्तिकं
तप्तायोघनमेषु स[9]स्मृति[9]पयोबिन्[10]दुः स्थितस्त[10]त्क्रमात् ॥
साफल्यं विफलत्वमाकृतितया प्रायेण नाशं [11]गतो[11]
[12]नाम्नाप्ये[12]व शिवात्मिकां परतरां भक्तिं किमाचक्ष्महे ॥ २५ ॥

---

[1] सै (अ). [2] प्य (अ). [3] स्मृति (अ). [4] ख (अ). [5] मे (अ) [6] णोः (य, क्ष). [7] तद्व (क). [8] खः (अ). [9] स्थित (अ). [10] न्दुस्थिता (अ). [11] ता (अ, क). [12] सामीप्ये (अ), नाम्नास्यै (क). ।

---

* अत्र 'शुक्ति' रिति पद्यस्य शार्दूलविक्रीडितवृत्तता 'अ, क' पुस्तकयोः निर्दिष्टा ।

* स्वच्छन्दाचारवर्तिन्या भक्त्या यत्कृतमर्चनम् ।
यद्भुक्तमर्पितं लिङ्गे [1]मनोवाक्कायकर्मभिः[1] ।।
गन्धपुष्पादिगन्धस्य ग्रहणं [2]यत्तदर्च[2]नम् ।
षड्रसास्वादनं [3]यत्तन्नै[3]वेद्याय प्रकल्पितम् ।।
† इन्द्रियाकारभा[4]वेन[4] विषयाकार[5]तस्तथ[5]म् ।
क्रीडया देवता भुङ्क्ते स्वत इत्यर्च[6]नं[6] मतम्§† ।। २६ ।।

‡लिङ्गदेहे शिवात्मायं लिङ्गाचारी न लौकिकः ।
सर्वलिङ्गमयं रूपं लिङ्गेन स[7]मम[7]श्नुते ।। २७ ।।

§शुभं कर्माशुभं कर्म ज्ञानकर्म प्रसादकम् ।
एतच्चतुर्विधं कर्म तत्तत्फलविधायकम्§ ।। २८ ।।

आत्मानं च पृ[8]थ[8]क् कृत्वा प्रेरितारं तथा पृ[9]थ[9]क् ।
असौ जुष्टस्ततः तेन ह्यमृतत्वाय कल्पते ।। २९ ।।

आत्मोपासक ईश्वरस्त्वयमुपास्यस्सर्ववेदैवेत्यसौ
भक्तिर्भोगकरी करोति शिवमात्मानं च कृत्वा पृ[10]थ[10]क् ।

---

[1] सत्यमेव मयोदितम् (अ). [2] तस्य पूजनम् (अ). [3] तस्य नै (अ) [4] सा सा (अ). [5] भासन (अ). [6] नं (अ, क). [7] ह अ (अ). [8], [9], [10] थु (क्ष).

---

* एतच्चिह्नितः श्लोकत्रयभागः यथामुद्रितप्रति २५ श्लोकत्वेनात्र निविष्टः ।

† एतच्चिह्नान्तर्गत 'इन्द्रियाकार' इति पद्यानन्तरं '२२' सङ्ख्यैकमात्र-सङ्केतितं "शिलालेखा" तथा "नैव लोप्या" इति पद्यद्वयं वर्तते ।

‡ एतच्चिह्नान्तर्गतः 'लिङ्गदेहे' इति श्लोकः 'य, क्ष' पुस्तकयोर्नास्ति ।

§ एतच्चिह्नान्तर्गतपद्यं 'अ, क' ग्रन्थयोर्नास्ति । एवं एतत्पद्यानन्तरं १५ संख्यात्वेन १६ संख्यात्वेन च संकेतितौ 'पापान्नरकः' तथा 'न योगो' इति श्लोकौ 'य' क्ष पुस्तकयोर्दृश्येते ।

धत्तनरक्षीरघृतारणीहुतवहस्रोतोम्बुवत्संयुतं
जीवेशैक्यपदं विभज्य परतोऽयस्यामृतत्वाय हि ॥ ३० ॥

नेत्रे च स्वविलोकिते सति पृथक्त्वं याति यत्तच्चिरं
रूपं वस्तु यदेकमेव पुरुषेणाश्चर्यसंस्पृग्धिया ।
कृत्वा भूय उभे समे यदि दृशौ तेनेक्षिते सत्यमू-
रूपं पूर्ववदेव विमलं चैकं स्वभावेन हि ॥ ३१ ॥

*सर्वाङ्गं लिङ्गमेव स्यात् अन्नपानाद्यमर्पितम् ।
प्रसादस्तृप्तिरेव स्यात् सर्वं लिङ्गमयं भवेत्* ॥ ३२ ॥

एवमद्वैतभक्त्यैव प्रसादस्सर्वतोमु[1]खः[1] ।
प्रसिध्यति ततस्सर्वमात्मरूपेण दृश्यते ॥ ३३ ॥

कर्ता कारयिता चैव कारणं कार्यमेव च ।
सर्वमात्मतया भाति प्रसादात्पारमेश्वरात् ॥ ३४ ॥

भोक्ता भोजयिता भो[2]गो[2] भोगोपकरणा[3]नि[3] च ।
सर्वमात्मतया भाति प्रसादा[4]त्पा[4]रमेश्वरात् ॥ ३५ ॥

†ग्राहकश्च तथा ग्राह्यं ग्रहणं सर्वतोमुखम् ।
सर्वमात्मतया भाति प्रसादा[5]त्पार[5]मेश्वरात्† ॥ ३६ ॥

जीवात्मा परमात्मा च तयोर्भेदश्च भेदकः ।
सर्वमात्मतया भाति प्रसादात्पारमेश्वरात् ॥ ३७ ॥

शरीरमिन्द्रियं प्राणा मनोबुद्धिरहङ्कृतिः ।
सर्वमात्मतया भाति प्रसादात्पारमेश्वरात् ॥ ३८ ॥

[1] खं (क्ष). [2] गं (अ). [3] दि (क्ष). [4] त्व (क). [5] त्प (अ).

* एतच्चिह्नान्तर्गतं पद्यं ‘ य, क्ष ’ पुस्तकयोर्नास्ति ।
† एतच्चिह्नान्तर्गतं पद्यं ‘ क ’ पुस्तके न दृश्यते ।
‡ एतच्चिह्नान्तर्गतपद्ये अकयोर्न स्तः

*विषयश्च निषेधाश्च निषि[1]द्ध[1]करणान्यपि ।
सर्वमात्मतया भाति प्रसादा[2]त्पार[2]मेश्वरात् ॥ ३७ ॥

†कामक्रोधादयस्सर्वे तथा शान्त्यादयोऽपि च ।
सर्वमात्मतया भाति प्रसादात्पारमेश्वरात् ॥ ३८ ॥

तस्माद्द्वैत[3]गां[3] भक्तिं आश्रयेत्सर्वसिद्धिदाम् ।
न च द्वैतात्मि[4]कां[4] भक्तिं क्लेशहेतुप्रदायिनीम् ॥ ३९ ॥

‡अन्योन्यप्रार्थकं द्वैतं समसंयोगयोस्तयोः ।
कं कं भजति भक्त्या सा भक्तिर्द्वैतगा न हि ॥ ४० ॥

अद्वैतपदरूढा या भक्तिर्द्वैतलक्षणा ।
सैवाद्वैताभिधा भक्तिः अन्या केवलकल्पिता ॥ ४१ ॥

द्वैतभ[5]क्त्या[5] हि संसारवर्धनं भिन्नरूपतः ।
अभिन्नरूप[6]तो[6] द्वैतभक्त्या संसारनाशनम् ॥ ४२ ॥

§द्वैतभ[7]क्तिः[7]प्रपञ्चाख्या केनचित्कल्पिता मृषा ।
अद्वैतभक्तिरचला निर्विकल्पा निरञ्जना ॥

---

[1] द्ध (अ). [2] त्प (अ, क). [3] गा (अ). [4] कं (अ). [5] क्ता (अ). [6] ता (अ. क). [7] क्ति (अ).

---

* विषयश्चेति श्लोकानन्तरं अस्यैवाधिकरणस्य ३२ तमः श्लोकोऽत्र पुनरावृत्तः—

प्रसादाद्दैवताभक्तिः प्रसादो भक्तिसम्भवः ।
यथैवांकुरतो बीजं बीजतो वा यदांकुरः ॥ " (अ).
क [1] प्रतौ श्लोकोऽयमत्र नास्ति ।

† 'कामक्रोधादय' इत्ययं श्लोकः 'अ क' पुस्तकयोर्नास्ति ।

‡ अन्योन्येत्ययं श्लोकः 'अ क' पुस्तकयोर्नास्ति ।

§ एतच्चिह्नितभागीयश्लोकत्रयाणि यथामुद्रितप्रति एकश्लोकसंख्यात्वेन परिगणितानि ।

द्वैतभक्तिनिवृ[1]त्तौ[1] हि साक्षादद्वैतलक्षणा ।
अचिरार्गरीयसी भाति निजनिर्वाणरूपिणी ॥ ४४ ॥

अद्वैतभक्तियुक्तस्य योगिनः सक[2]लाः[2] क्रियाः ।
आस्ते दग्धपटन्यायात् क्रियामात्रा हि न क्रिया§ ॥ ४५ ॥

क्रियामात्रा क्रिया [3]नैव[3] प्रतिबन्धा[4]य[4] देहि[5]नाम्[5] ।
केव[6]ला[6] निर्मला शुद्धा फलकामविवर्जि[7]ता[7] ॥ ४६ ॥

†फलकामप्रयुक्ता हि क्रिया सा प्रतिबध्यते ।
क्रियामात्रा न बन्धायेत्यत्राश्चर्यं किमुच्यताम् ॥ ४७ ॥

‡निष्फला निष्फला नैव सफला सफला न हि ।
क्रियाद्वैतसिद्धान्तभक्तियोगसमाश्रिता ॥ ४८ ॥

फलकाम[8]तया कर्मकरणं[8] प्रतिबध्यते ।
¶न कर्ममात्रकरणं तस्मात्कर्मफलं त्यजेत् ॥ ४९ ॥

त्यक्ते कर्मफले[9]ऽप्यस्य[9] विलासो नैव बाधते ।

---

[1] त्ता (क्ष)· [2] ल (अ, य, क्ष). [3] द्वैत (क). [4] हि (क).
[5] नः (अ, क). [6] लं (अ). [7] तः (क)· [8] प्रयुक्ताः क्रियाः न (क).
[9] कर्म (अ, क)·

---

† फलकामेत्ययं श्लोकः अ, क पुस्तकयोर्न दृश्यते ।

‡ निष्फलेत्ययं श्लोकः क, य, क्ष पुस्तकेषु नास्ति ।

¶ 'न कर्म' इत्येतत्पद्यार्धस्थाने क पुस्तके पाठान्तरं यथा—
'क्रियामात्मानुबद्धायेत्यत्राश्चर्यं किमुच्यताम् ।'

§ एतच्चिह्नान्तर्गतः सार्धैकश्लोकः यथामुद्रितप्रति एकसंख्यात्वेन परिगणितः ।

यथा चित्रप[1]टं[1] स्त्रीणां विलासो नैव बाधते ।
तथाद्वैत[2]क्रियाणां[2] च विलासो नैव बाधते ।। ५० ।।

न प्ररोहन्ति बीजानि यथा भ्रष्टानि भूतले ।
अद्वैतभक्तियुक्तानि कर्माणि च तथैव [3]च[3] ।। ५१ ।।

*यथा वन्ध्याः स्त्रियो लोके फलाय न कदाचन ।
तथाद्वैतक्रिया लोके फलाय न कदाचन ।। ५२ ।।

†अद्वैतभक्तिरूपेण दृश्यन्ते तत्प्रभावतः ।
नैष्फल्यमिति सम्भ्रान्तिस्साफल्यमिति विभ्र[4]म[4]ः ।। ५३ ।।

‡ वन्ध्या सकामा यदि पुंसि सङ्गमं
करोत्यकामापि फलं यथा न हि ।
भक्तिस्सदा सङ्गममीश्वरे मुदा
करोत्यपि स्यात्फलमेव नेतरत् ।। ५४ ।।

न नैष्फल्यं न साफल्यं क्रियाणामस्ति [5]व[5]स्तुतः ।

---

[1] ट (क्ष). [2] त विलासश्च क्रियाणां (अ, क). [3] हि (अ). [4] मः (क). [5] त (अ).

---

* "यथा वन्ध्या" इति पद्यानन्तरं यक्षयोः इमान्यधस्तनानि पद्यानि दृश्यन्ते—

निष्फला निष्फला नैव सफला सफला न हि ।
क्रियाद्वैतसिद्धान्तभक्तियोगसमाश्रिताः ॥

'क' पुस्तके चायमेकश्श्लोको दृश्यते यथा—

फलं हि प्रतिबन्धस्स्यात् सुखस्य रतिसङ्गमे ।
तस्मात्पुंसि शिवेनैव वन्ध्याभक्तौ फलागमः ॥

‡ एतच्चिह्नान्तर्गतः श्लोकः 'अ क' योर्नास्ति ।
† एतच्चिह्नान्तर्गतो भागः 'क' पुस्तके नास्ति ।

समौ निम्नोन्नतौ नाभिकुचौ चित्रपटे स्त्रि[1]य:[1]: ।
क्रियानैष्फल्यसाफल्ये स[2]त्य[2]द्वैते तथा समे ।। ५४ ।।

यथा नानाविधा नद्यो नानाविधजला अपि ।
स्यन्दमा[3]ना[3] इमास्सर्वाः [4]अकूपारं[4] समाश्रिताः ।। ५५ ।।

*तद्रूपेणैव दृश्यन्ते नाम[5]रूपे[5] विहाय च ।
तथाद्वैतं समाश्रित्य क्रिया नानाविधा अपि ।। ५६ ।।
अद्वैत[6]भक्ति[6]रूपेण दृश्यन्ते भक्तियोगतः ।*

क्रियाकारस्वरूपेण प्रती[7]ताप्ये[7]व सर्व[8]दा[8] ।
न केवलक्रिया ह्यस्य लीलामात्रस्वभावतः ।। ५७ ।।

‡अर्चनार्पणरूपेण तत्सर्वं तु प्रतीयते ।
लीलया सकलाकारा स्वयं सा भक्तिदेवता ।। ५८ ।।

क्रीडन्ती स्वात्मनाऽऽत्मानं भुङ्क्ते चैतच्छिवार्पितम् ।
अनुरागपरा भक्तिर्विषयेषु विशुद्धधीर्विरागपरा ।। ५९ ।।

अनुरागेण विरागेण सन्ततं भक्तिरेव निर्लेपा ।
अन्तर्लेपबहिर्लेपत्यागग्रहणयोस्समा ।। ६० ।।

---

1 याः (अ). 2 त्या (अ). 3 न (अ). 4 पारावारं (अ), अकूपारं न (क्ष). 5 प (अ). 6 तत्व (क). 7 त इ (अ). 8 था (क, य, क्ष).

---

* एतच्चिह्नगतः सार्धश्लोकैकभागः यथामुद्रितप्रति ५३ संख्याकश्लोकत्वेन गणितः ।

‡ एतच्चिह्नान्तर्गतः 'अर्चना' इत्यारभ्य 'स्थितिः' इत्यन्तो भाग 'अ, क' पुस्तकयोर्नास्ति ।

विषयाणां विषयिणां अनुरागविरागिणाम् ।
तस्माद्भक्तिर्न गृह्णाति न जहाति किमप्यसौ ॥ ६१ ॥

अनुरागेण यद्वस्तु विरागेणापि शाम्भवी ।
यथा तमःप्रकाशाभ्यां युक्तोऽप्याकाश एतयोः ॥ ६२ ॥

निर्लेपतः स शुद्धात्मा तथा ताभ्यां तयोश्च सा ।
तमो ज्योत्स्नाप्रवृत्तिर्हि रात्रावेव न चाहनि ॥ ६३ ॥

पुण्यपापोभयं कर्ममते भक्तिमते कुतः ।
अहन्यातप एवास्ते तमो ज्योत्स्नाविलक्षणे ॥ ६४ ॥

तथा भक्तिपदे शैवं पुण्यपापविलक्षणे ।
अहन्यहस्करो भाति भर्गो भक्तिपदे तयोः ।
प्रभावो ह्यातपस्यैवमित्येतदुभयं मतम् ॥ ६५ ॥

ज्ञानैकलक्षणं शैवमुष्णलक्षण आतपः ।
तमश्चन्द्रिकयोस्सख्यमुभयोश्चैक्यलक्षणात् ॥ ६६ ॥

रात्रौ व्यवस्थितत्वाच्च तद्वदज्ञानलक्षणात् ।
कर्मण्येव स्थितत्वाच्च सख्यं स्यात्पपुण्ययोः ॥ ६७ ॥

†तस्माद्भक्तिपदे पापपुण्ययोर्नैव वर्तते ।
अत एव परायां तु भक्तौ न च शुभाशुभे ॥ ६८ ॥
ज्ञानं प्रसादादेव स्यादित्येषा शाम्भवी स्थितिः ।‡

---

† एतच्चिह्नान्तर्गतः सार्धैकश्लोकः यथामुद्रितप्रति एकश्लोकसङ्ख्यात्वेन गणितः ।

ज्ञानादेव हि मोक्षस्स्यात् मोक्षादुपरि शाम्भवी ।
भक्तिः [1]गुरु[1]तरा भाति स्वतन्त्रा निजलीलया ।। ६९ ।।

धर्मादिपुरुषार्थानां चतुर्णां परतः प[2]रा[2] ।
पञ्च[3]मः[3] पुरुषार्थो हि भक्तिश्शैवी सनातनी ।। ७० ।।

लोकयोरुभयोरैहिकामुष्मिकपदार्थयोः ।
गमा[4]गमौ[4] विनैवास्ते भक्तिस्सम्पूर्णवैभवा ।। ७१ ।।

*भावानुरूपफलदा स्वाश्रितानां फलैषिणाम् ।
उत्तरोत्तररूपेण भक्तिः पूर्णा निरुत्तरा ।। ७२ ।।

केचित्प्राणैस्सह शिवपदं केचिदात्मीयकार्यैः
केचिद्दारैर्निजतनुभवैः मन्दिरैर्बन्धुवर्गैः ।
ग्रामैर्देशैस्सह परिजनैः केचिदन्ये क्रमेण
त्यक्त्वा चैतत्सकलमपि यान्ति स्वयं चैव भक्ताः ।। ७३ ।।

प्राणादिवस्तुविषयेष्वनुरागयुक्ता
भक्ताः प्रयान्ति कतिभिस्सह तैश्शिवैक्यम् ।
केचिद्विरागनिरता विषयेषु तेषु
त्यक्त्वा च तान् शिवपदं स्वयमेव यान्ति ।। ७४ ।।

---

[1] पर (अ, क). [2] रः (अ, क). [3] मं (अ). [4] मं (अ, क).

---

* एतच्चिह्नान्तर्गतः 'भावानुरूप' इत्यारभ्य 'शिवभावकारिणी' इत्यन्तो भागः 'अ, क' पुस्तकयोर्नास्ति ।

भक्तिरेव परमार्थदायिनी
भक्तिरेव परतत्त्ववेदिनी ।
भक्तिरेव भवदोषहारिणी
भक्तिरेव शिवभावकारिणी* ।। ७५ ।।

†अतःपरं भक्तिविलासवैभ[1]वे[1]
सदा शिवाद्वैतपरायणः स्वयम् ।
प्रसादमासाद्य निजैक्यसौख्यदं
स्वमेव गायन् विचरेत्स्वलीलया ।। ७६ ।।

‡अतत्वसंसारविनाशने सदा
श्रुतिप्रमाणेन च तर्कवर्त्मना ।
प्रबोधमानाश्च शिवस्वरूपं
स्वमेव गायन् विचरेत्पुमान् महीम् ।। ७७ ।।

ये रुद्रलोकादवतार्य रुद्रा
मानुष्यमाश्रित्य जगद्धिताय ।
चरन्ति नानाविधचारुचेष्टाः
तेभ्यो नमस्त्र्यम्बकपूजकेभ्यः‡ ।। ७८ ।।

---

[1] वैः (य, क्ष).

---

† एतच्चिह्नान्तर्गतो भागः 'क' पुस्तके न दृश्यते ।

‡ एतच्चिह्नान्तर्गते पद्ये 'क्ष' पुस्तकमात्रे स्तः ।

*नाहमनात्मा पश्चात्कोऽहं
योऽहं पदस्थ आत्मा साक्षी ।
सोऽहं तत्पतिशिवदासोऽहं
दासोऽहमिति चरेदुपरि पदे ॥ ७९ ॥

इति परमरहस्यं वेदवेदान्तसारं
हृतभवभय[1]बाधं[1] षट्स्थलब्रह्मबोधम् ।
गुरुशिवपदभक्त्या प्राप्तविद्याय देयं
विरहितघनभक्तिश्रेयसे नैव देयम् ॥ ८० ॥

नाशिष्येभ्य[2]श्शते[2]भ्यो [3]वा[3] नाभक्तेभ्यः कदाचन ।
[4]व्याहरे[4]दीदृशानर्थान् इति वेदानुशासनम् ॥ ८१ ॥

क्रियाविश्रान्तिरित्येवं मया संसारनाशिनी ।
अद्वैतभक्तिनिर्वाणनिष्ठा काष्ठा समीरि[5]ता[5] ॥ ८२ ॥

§ श्रीमद्दैपुरसोमेशलिङ्गाय लिङ्गरूपिणे ।
लिङ्गाङ्गैक्यस्वरूपाय नमस्ते लिङ्गमूर्तये ॥ ८३ ॥

नमश्शब्द उमा साक्षाच्छिवशब्दः शिवस्स्वयम् ।
अयशब्दस्तयोर्योगः सोमतत्त्वमुपास्महे ॥ ८४ ॥

---

[1] दूरं (अ). [2] श्रते (अ), श्रैते (य, क्ष). [3] ऽपि (अ). [4] व्याहारेनी (अ), ग्राह्य (य, क्ष). [5] तः (क).

---

* नाहमात्मेति पद्यस्यादौ उपजातिवृत्तमिति 'अ' पुस्तके वृत्तनिर्देशः कृतः ।

§ एतच्चिह्नान्तर्गतो भागः 'अक' योर्नास्ति । अथापि सिद्धान्तसारनिर्वचनरूपत्वादस्येह सिद्धपाठत्वेन स्वीकारः कृतः ।

अवाच्यात्मस्वरूपाय शिवभावप्रदायिने ।
नमस्सद्गुरुनाथाय षट्स्थलब्रह्ममूर्तये ॥ ८५ ॥ §

स्वानुभूतिविभवावगाहिना
मायिदेवविभुना महात्मना ।
श्रीशिवानुभवसूत्रमुत्तरं
तन्त्रमुक्तमतिशोभनं परम् ॥ ८६ ॥

एतद्यो वेद सोऽविद्याग्रन्थिं विकिरति प्रभुः ।
शिवसिद्धान्तकं तन्त्रं शिवाद्वैतं शिवं पदम् ॥ ८७ ॥

[1]इति श्रीवातुलोत्तरतन्त्रे शिवसिद्धान्ततन्त्रे अनुभवसूत्रे षट्स्थलनिर्णये[1] क्रियाविश्रान्तिर्नाम अष्टमाधिकरणं सम्पूर्णम्

---

[1] इत्यऽनुभवसूत्रे शिवसिद्धान्ततन्त्रे षट्स्थलनिर्णये (अ, क), इति वातुलोत्तरतन्त्रे षट्स्थलनिर्णये (य), इति शिवानुभवसूत्रे षट्स्थलनिर्णये शिवसिद्धान्ततन्त्रं (क्ष).

अनुभवसूत्रसूची

अ